THE

# PRINCESS OF WALES SARASVATĪ BHAVANA TEXTS

EDITED BY

GANGĀNĀTHA JHĀ

AND

GOPĪNĀTHA KAVIRĀJA

---

## No. 2

---

THE

# ADVAITACHINTĀMAṆI

---

BENARES:
Printed by Dr. Jagannatha Prasad, M. B., B. S., proprietor, E. J Lazarus & Co., at the Medical Hall Press.

1920

रङ्गोजीभट्टविरचितः

# अद्वैतचिन्तामणिः

THE

# Advaita Chintāmaṇi

OF

## RANGOJĪ BHAṬṬA

EDITED WITH INTRODUCTION ETC.

BY

NĀRĀYAṆA ŚĀSTRĪ KHISTE SĀHITYĀCHĀRYA,

*Assistant Librarian, Government Sanskrit Library, Saraswatî Bhavana, Benares.*

Printed by Dr. Jagannath Prasad, M. B., B. S., proprietor, E. J. Lazarus & Co., at the Medical Hall Press, Benares;

and

Published under the authority of the Government of the United Provinces by the Government Press, Allahabad.

GOVERNMENT SANSKRIT LIBRARY, BENARES

1920.

। श्रीः ।

# उपोद्घातः ।

राजीवराजिजीवनमौलि, धनुर्बाणपाशसृणिधारि ।
तरुणारुणाभमरुणं, तरुणं युगुलं भजे किमपि । १ ।

## ( क )

### ग्रन्थकर्तुर्वंशपरिचयः ।

---

अथाऽयमुपक्रम्यते ऽद्वैतचिन्तामणिर्नाम निबन्धो मुद्रयित्वा प्रकाशयितुम् । अस्य निर्माता किल प्रसिद्धो विपश्चित् 'रङ्गोजीभट्ट' नामा । एतेन प्रकृतग्रन्थाऽवसाने 'वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा । भट्टोजीभट्टसंज्ञं तं गुरुं नौमि निरन्तरम्' इति भट्टोजीदीक्षितः स्वगुरुत्वेनोपश्लोकितः । ( बृहद् ) वैयाकरणभूषणस्यारम्भे 'पितरं रङ्गोजिभट्टाभिधम्' 'भट्टोजीदीक्षितमहं पितृव्यं नौमि सिद्धये' इत्यादिना पद्यकदम्बेन तद्रचयिता श्रीकौण्डभट्टो भट्टोजीदीक्षितरङ्गोजीभट्टयोर्भ्रातृत्वमवागमयत् । रङ्गोजीभट्टश्च भट्टोजीदीक्षितस्य कनीयान् भ्राताऽऽसीदिति तदीयगुरुत्वोक्त्या सिद्धमेव ।

किञ्च भट्टोजीदीक्षिते ऽस्य गुरुत्वोक्तिर्न केवलं ज्येष्ठभ्रातृत्वनिबन्धना, किन्तु तदन्तेवासित्वनिबन्धनेति प्रतिभाति । वयसा गुरुषु गुरुशब्दमप्रयुज्य मन्त्रविद्ययोर्दातर्येव तथा प्रयुञ्जानानामभियुक्तानां व्यवहारश्चात्र प्रमाणतयोपतिष्ठन्ते ।

अद्वैतदीपिका, वेदान्ततत्त्वविवेक, भेदधिक्कारादिग्रन्थनिर्माता नृसिंहाऽऽश्रमयतिरपि'तदुक्तं श्रीनृसिंहाऽऽश्रमगुरुचरणैः' इति प्रकृतग्रन्थे ऽसकृदनेन प्रमाणतयोपन्यस्त इति सोऽप्यस्य गुरुरासीदिति वक्तुं शक्यम् ।

ग्रन्थान्तपुष्पिकायाञ्च 'इतिश्रीसदानन्दाश्रमचरणसेवापरायणेन रङ्गोजीभट्टेन विरचितोऽद्वैतचिन्तामणिः समाप्तः' इत्युक्तेरानन्दाश्रमाऽऽख्यो यतिरप्यस्य पूज्य आसीदिति ज्ञायते । कोऽसावानन्दाश्रमः ?

अपि निर्मिता अनेन केचिद् ग्रन्थाः? इत्यादिकमवगन्तुं न किञ्चिदपि द्वारमुपलभ्यते।

भट्टोजीदीक्षितेन स्वकृते 'शब्दकौस्तुभ'नामके निबन्धे 'लक्ष्मीधरः' स्वपितृत्वेन वर्णितः, तथाच रङ्गोजीभट्टस्याऽप्ययमेव जनक इति सिद्ध्यति।

कोण्डभट्टश्च स्वकृत'पदार्थदीपिका'ऽवसाने 'बालबुद्धिप्रकाशार्थं पदार्थानां प्रदीपिका। रङ्गोजीभट्टपुत्रेण कोण्डभट्टेन निर्मिता' इति-पद्येनाऽऽत्मानं रङ्गोजीभट्टपुत्रत्वेन वर्णयति।

इत्थञ्च लक्ष्मीधरस्य सूनुः, नृसिंहाश्रमाऽऽनन्दाश्रमयोरन्तेवासी, भट्टोजीदीक्षितस्य कनीयान्, कोण्डभट्टस्य जनकः किलैतद्ग्रन्थकर्त्तेति निर्विचिकित्सम्।

## ग्रन्थकर्तुः समयनिर्णयः।

विश्वविख्यातवैदुषीवैभवस्य भट्टोजीदीक्षितस्य समयनिर्णयेनैव प्रकृतग्रन्थकर्तुरपि समयो निर्णेतुं शक्य इति प्रथमतो भट्टोजीदीक्षितसमय एव निर्णीयते।

१६५० मिते खीस्ताब्दे भारतसम्राजो दिल्लीश्वरस्य 'शहाजहान'-नाम्नः प्रतापभास्वतो मध्याह्नवेलायां विकस्वरकमलायमानतामासेदुषा, सर्वतन्त्रस्वतन्त्रचञ्चुगिनिरुपमधिषणावैभवेन, नानानिबन्धरचनावाप्तयशसा, पण्डितराजजगन्नाथेन स्वकृते 'मनोरमाकुचर्दनम्'इत्याख्यनिबन्धस्योपोद्घाते "इह केचिन्निखिलविद्वन्मुकुटमयूखमालालालितचरणानां शेषावतंसानां श्रीकृष्णपण्डितानां प्रसादादासादितशब्दानुशासना, स्तेषु च पारमेश्वरं पदं प्रयातेषु कलिकालवशंवदीभवन्तः प्रक्रियाप्रकाशं स्वयं निर्मितायां मनोरमायामाकुलयकार्षुः। सा च प्रक्रियाप्रकाशकृतां पौत्रैरस्मद्गुरुपण्डितवीरेश्वराणां तनयैर्दूषिताऽपि स्वमतिपरीक्षार्थं पुनरस्माभिर्निरीक्ष्यते" इत्युक्तवता भट्टोजीदीक्षितः 'प्रक्रियाप्रकाश'कर्तुः शेषकृष्णस्य शिष्यः प्रत्यपादि, स्वयञ्च शेषकृष्णात्मजवीरेश्वरपण्डितस्य शिष्य इति। सुतरामेतावतैतदीयसमयात् विंशतिवर्षपूर्वभाविता भट्टोजीदीक्षितस्याऽपि प्रौढेः समयस्य सम्भाव्यता नाऽसमञ्जसेव। तद्भ्रातू रङ्गोजीभट्टस्याऽपि स एव स्थितिसमय इति परिशेषादेव सिद्धम्।

अत्र १६३५ मितख्रीस्ताब्दीयो नीलकण्ठशुक्लाख्यः पण्डितः स्वरचितग्रन्थान्ते भट्टोजीदीक्षितं स्वगुरुत्वेन बोधयन् मत्सम्भावितप्रकृतग्रन्थकृत्तत्समसमयताबोधने साहायकमाचरति ।

## ग्रन्थकर्तुर्जातिधर्मादिपरिचयः ।

भट्टोजीदीक्षितनागोजीभट्टप्रभृतयः काशीनिवासिनो दाक्षिणात्यमहाराष्ट्रब्राह्मणा आसन्निति तद्विषये प्रचलिताभिरसङ्ख्याभिः कथाभिः सिद्धम् ।

सुतरां रङ्गोजीभट्टोऽपि काशीवासी दाक्षिणात्यमहाराष्ट्रब्राह्मण एवेति निर्विवादम् ।

'अद्वैतशास्त्रसारोद्धार'नामकोऽप्यनेन कश्चिदद्वैतवेदान्ते निबन्धो रचितः, यस्य प्रथमः परिच्छेद एवोपलभ्यते । तं प्रकृतग्रन्थस्य मुहुर्मुहुरालोचयतः स्पष्टमिदं प्रतिभाति, यत् माध्व ( वैष्णव ) सम्प्रदायखण्डनाय बद्धपरिकरोऽयं भगवति वासुदेवेऽसीमभक्तिभागासीदिति ।

( ख )

## ग्रन्थसमालोचनम् ।

यद्यप्यद्यत्वे प्रचरितेषु अद्वैतवेदान्तनिबन्धेषु प्रकरणनिरूपणपराः सिद्धान्तसामञ्जस्यप्रवणाः परमतनिराकरणबद्धपरिकराः शास्त्रदिग्दर्शनकुतूहलविधायिनः, सन्त्येवाऽध्ययनाऽध्यापनपरिशीलनादिषु विशेषोपयोगिताभाजः पञ्चदश्यादयः शारीरकभाष्यादयोऽद्वैतसिद्ध्यादिप्रमुखाः सिद्धान्तलेशादिजातीया नानाविधा एव निबन्धतल्लजाः, तथाऽपि विविधाऽभिरूपोपपन्नताऽऽस्पदानि, नैकविधप्रतिभाविजृम्भमाणानि, प्राचीनाऽर्वाचीनसाधारणानि, बहुश्रुतैरप्यश्रुतचराणि, प्रचुरदर्शिभिरप्यनवलोकितानि, कानिचिन्निबन्धरत्नानि स्वप्रकाशकारणसमयवशात् शास्त्रहितैषिसुजनोद्योगात् राजकीयविशिष्टाऽनुसन्धानमहिम्नो वा, कदाचित् कुतश्चित् क्वचिच्च तथा लब्धप्रकाशानि भवन्ति, यथा ऽनितरसाधारणीं कुतूहलितामासादयन्ति । तादृशेष्वेवैषोऽद्वैतचिन्तामणिरप्यन्यतमं निबन्धरत्नम् ।

अयं हि ग्रन्थो यथा नाऽत्यल्पपरिमाणस्तथैवैतस्तथा न महत्स्वपि परिगणनाऽर्हः। यद्यपि कर्त्रा याट्टशा दिशा निबन्धुमुपक्रान्तोऽयं, ताट्टशैव पुङ्खाऽनुपुङ्खनिरूपणपरायणया व्यभन्स्यत्, तदाऽति महतीमेवेयत्तामासादयिष्यत्। किन्तु मन्ये नैतावता निबन्धा फलेग्रहिमनोरथोऽभविष्यत्। तथा हि-अस्य ग्रन्थस्याऽवलोकनेन बाढमेतत्प्रतीयते यन्निबन्धुरभिप्रायस्तावत्-अद्वैतसिद्धान्तपरमफल,साक्षात्तदुपायोपवर्णनपूर्वकं प्रधानमल्लनिबर्हणन्यायेन द्वैतसिद्धान्तबद्धपरिकरनैयायिकप्रतिद्वन्द्विताभिरसनमुखेनाऽवान्तरसमानतन्त्रैकदेशिमतदौर्बल्यप्रदर्शनेन च संक्षेपेणाऽद्वैततत्त्वमधिजिगमिषूणामनायासेन प्रवृत्तिसाफल्यमुद्दिश्य किमपि ग्रन्थरत्नं निबन्धनीयमिति।

एवं स्थिते सिद्धान्तनिरूपणस्य, खण्डनविस्तरस्य, प्रकृतसिद्धान्तप्रमेयसाकल्यप्रतिपादनस्य वा यद्युपपादनमभविष्यत्, कथमिवोक्ताऽधिकारिणामिहाऽनायासता समपत्स्यत। अत एव स्वप्रतिकूलाऽखिलमतान्येव प्रत्यवतिष्ठापयिषुणाऽपि जैमिनिकपिलपतञ्जलिप्रभृतिसिद्धान्तितविषयान्निराकृत्यैव कणभक्षाऽक्षपादोपज्ञ प्रमेयप्रमाणलक्षणविभागप्रक्रियाऽस्प्रदूष्य तथाऽऽपत्त्यनुपपत्तीश्च प्रदर्श्य तदीयसरणयेवाऽभिजेषत। प्रासङ्गिकञ्चाऽन्यदीयमपि किञ्चिदद्दूष्येव विबुभूषयिषुणा स्वराद्धान्तस्।

उक्तचरमेवैतत्, यद्विस्तराद्बिभ्यदयं निबन्धा सिद्धान्तत्रिपाधयिपितान् नाऽखिलाऽर्थान् प्रत्यपीपदत्, तथाऽपि परमफलसाक्षादुपायभूततत्त्वमस्यादिमहावाक्यजन्यज्ञानं प्रतिपिपादयिषता ऽनेन नान्तरीयकप्रतिपाद्यतत्त्वम्पदार्थयोः शक्तिभक्तिव्यवस्थां विशदय्य, सैद्धान्तिकीमखण्डाऽर्थतां निर्विवक्षुणा केचन विषयाः परःक्षुण्णोऽपि निरूपणवैदग्ध्या तथोपपादिषत, यथाऽननुशीलिताऽऽकराणां चेतःसु नव्यायमानतां भजन्ते।

## ग्रन्थस्यविषयसमालोचनम्।

तथा हि—बहुसम्मतमपि योग्यताऽऽकाङ्क्षाऽऽसत्तीनां शाब्दबोधकारणत्वमभ्युपेत्य मौक्त्या प्रकारान्तराऽनुसरणेन वा निरा-

कारि । किं बहुना तात्पर्यज्ञानस्याऽपि तथात्वं तथा कृतम् । एवमेव साक्षिणः शुद्धचित्प्रतिबिम्बत्वं, शाब्देतरज्ञाने निर्विकल्पत्वनिरसनं, तत्त्वमस्यादिश्रुतेरखण्डाऽर्थत्वेऽपि वाक्यत्वं, शुद्धचितः सत्याऽऽदिपदाऽवाच्यत्वञ्चाऽन्यच्च प्रासङ्गिकमेवंजातीयं स्वग्रन्थे यथा वर्णितं तथैवाऽऽस्थेयम् ।

अन्ये च विषया यद्यप्यद्वैतवेदान्तसिद्धान्ताऽनुमोदिता एव परिष्कृता उपस्कृताश्च ग्रन्थकृता, तेषां शृङ्गग्राहिकतयाऽत्रोपवर्णनस्य नाऽतीवोपयोगितां मन्यमानेन तथारूपेण सूचीपत्रे प्रदर्शिततया च मया नेहोल्लेखः कृतः । परमतनिराकरण एव तावत् प्रकृतनिबन्धकृता नानाजातीयाः सरणयः प्रदर्शिता एता एव नूनं समीक्षकाणां चमत्कारितामधिकमादध्युरिति तास्वेव काश्चन प्रदर्श्यन्ते ।

तमसो द्रव्यत्व, आकाशदिक्कालानामीश्वराऽभेदः, मनसोऽन्यथासिद्धत्वञ्च दीधितिकृदादिनव्यनैयायिकैरपि प्रतिपादितानीति वस्तुगत्या नवीनान्येव ।

किन्तु वायोः पृथिवीविशेषत्वं, चक्षुरिन्द्रियस्य तदितरेन्द्रियकार्यनिर्वाहकताप्रदर्शनमुखेन स्थाप्यमानमिन्द्रियाणामेकत्वञ्च, प्रायेण नवप्रकारत्वमेवाऽऽभाति ।

एवं तार्किकाऽभिमतगुणेषु केषाञ्चिन्निरसनं, केषाञ्चिदन्यत्राऽन्तर्भावः, परिमाणेतरधात्वं, प्रेक्षावतां मनोविनोदाऽऽवहमेव । आत्मतत्त्वे, जीवतत्त्वे, साक्षितत्त्वे चाऽद्वैतसिद्धान्तसम्प्रदायाऽऽगता एव पन्थानः परिशीलिताः, परन्तूक्तिवैचित्र्यमात्रेण ।

निबन्धे ह्यस्मिन् ग्रन्थकृत् परमतखण्डनस्वमतप्रमेयस्थापनरूपं बहिरङ्गकारणं, तत्त्वपदार्थसाक्षात्परम्परासाधारणसम्बन्धनिरूपणरूपमन्तरङ्गकारणञ्चाऽभिप्रयन् निबद्ध्यमानग्रन्थं द्विधा परिचिच्छेदेति परिच्छेदद्वैविध्ये प्रयोजकं युक्तमाकलयामि ।

तत्त्वम्पदार्थनिरूपणपरे द्वितीयपरिच्छेदे हि निरूपितान् व्यस्ततया ग्रन्थान्तरेषु वर्तमानान् विषयान् स्वाऽभिमतपरिपाट्या संजिघृक्षमाणः संक्षिप्यैवोपपादयतिस्म । अत एवाऽनवीकृतिमेषु सम्भावयता

प्रातिस्विकरूपेण सूचीपत्रे निर्दिष्टतया च ते मया नेहोदलेखिषत ।

मध्यस्थदृष्ट्या समालोच्यमानेऽस्मिन् निबन्धे समुपवर्णिता विषया आकरादिबागरपारदृश्वनां चेतश्चमत्कारं मा नाम तानिषत, खण्डनमण्डनकुतुकिनां प्रचण्डपाण्डित्यजुषाञ्च विशेषकोटिपरम्पराऽनिरूपणेन कौतुकं मा नाम धिषत, इदम्प्रथमतया प्रविविक्षूणाञ्च स्वान्तानि मा स्म नन्दयन्, तथाऽपि संक्षिप्तेनैव प्रकारेण परमतखण्डनपुरःसरं नव्यप्रणालीदिग्दर्शनपूर्वकञ्च प्रकृतशास्त्रप्रतिपित्सिततत्त्वबुभुत्सूनां मानसेषु निबन्धरत्नमिदं यथा संमदं सम्पादयिष्यति, न तथा ऽद्यत्वे प्रचञ्चूर्यमाणेषु ग्रन्थेष्वेकतमोऽपीत्यङ्कारं तथा कर्तुमर्हतीति ग्रन्थस्याऽस्योपादेयतां संमन्ये ।

( ग )

ग्रन्थसंशोधनप्रसाधनाऽवश्यवक्तव्यानि ।

दिदृक्षुजनसौकर्याय चाऽत्र यावतामेव विषयाणां सूचीपत्रं, तथाऽर्थविशेषपराणां निर्देशाऽर्हशब्दानामकारादिवर्णक्रमाऽनुसारि सूचनिकान्तरञ्चोपनिबद्धम् । अत्र ग्रन्थकृता प्रमाणतयोपन्यस्तानां ग्रन्थानां ग्रन्थकृताञ्च नामानि, प्रकृतप्रमेयप्रतिपादनाऽवलम्बनतयोपदर्शितानां परःशतानां श्रुतिस्मृतिपुराणवचनानां तत्तदुपलब्धमूलग्रन्थतदध्यायपादश्लोकादिनिर्देशश्चेत्येतानि महता श्रमेण योजितानि ।

ग्रन्थकृता स्वगुरुत्वेनाऽसकृदुद्घोषितस्य नृसिंहाश्रमस्य प्रमाणतयोपन्यस्तानामुक्तीनां मूलग्रन्थाऽऽधारमविद्याऽविद्याऽस्यन्यादय सुतरां खेदं वहामि ।

नृसिंहाऽऽश्रमस्य ग्रन्थत्रयमेवाऽद्यावधि मुद्रितमासाद्यते ।

**(१) वेदान्ततत्त्वविवेकः** । मदीयगुरुचरणैः पूज्यवरमहामहोपाध्याय श्रीदं पं० **तैलङ्गरामशास्त्रिवर्य्यैः** संशोधितः ।

**(२) भेदधिक्कारः** श्री० म० म० पं० **द्राविडलक्ष्मणशास्त्रिमहाशयैः** संशोधितः । **(३) अद्वैतदीपिका** । श्री पं० **गोपालशास्त्रिभिः** संशोधिता ।

ग्रन्थत्रयमिदमसकृदवलोक्याऽपि तत्रैतद्ग्रन्थे प्रमाणतयोपन्यस्तासु नृसिंहाऽऽश्रमोक्तिष्वेकामपि नाऽध्यगच्छम् ।

बहुकृत्वः शोधनश्रममूरीकृत्याऽतीवाऽवदधता मया सुपरिशोधितेऽप्यत्र वर्णयोजकदोषेण, मानुष्यकसुलभस्खलनेन च लब्धाऽवसरा अशुद्धीर्मरालप्रकृतयो गुणगृह्या विपश्चिदपश्चिमाः क्षमेरन्नेवेति दृढमाशासे ।

दुर्लभतमोऽयङ्ग्रन्थो मया काशीस्थराजकीयपुस्तकालयादधिगतः । आदर्शान्तरञ्चाऽस्य ग्रन्थस्य न क्वाऽप्यधिगतवानस्मीति प्रायः शुद्धेनैकेनैवाऽमुना पुस्तकेन शोधनकार्यमारभे ।

इदम्प्रथमेऽप्यत्र कार्ये वाराणसेयभूतपूर्वराजकीयसंस्कृतपाठालयप्रधानाध्यक्ष विविधविद्यानदीष्णविद्वद्ग्रेसरश्रीमत् Dr. A. Venis C. I. E. महोदयानामाज्ञावशंवदो राजकीयसरस्वतीभवनपुस्तकालयप्रधानाध्यक्षैर्विविधदर्शनपरामर्शनकर्शितमतिभिः प्राच्यप्रतीच्योभयविद्यासम्भेदकृतावगाहैः पूज्यवरश्रीगोपीनाथकविराज महोदयैः प्रकृतकार्यसम्पादनानुकूलसरणिप्रदर्शनादिना संवर्धितोत्साहश्च प्रावर्तिषि ।

अथाऽस्मदीयदुरदृष्टोन्मीलनवशादकालमेव कालवशमुपगते श्रीमति वेनिससाहिबमहोदये एतद्ग्रन्थप्रकाशने प्रायो निरुत्साहतैव समपद्यत । मोघत्वं चोपजगाम परिश्रमः । किन्तु 'दुःखस्यानन्तरं सुखम्' इति नियतिनियमस्यानुल्लङ्घनीयत्वादेव ग्रीष्मावसाने जलदागम इव विविधग्रन्थनिर्माणसमुज्जृम्भमाणराकाशशाङ्कसङ्काशसुयशःसन्तानधवलीकृतदशदिशावकाशो विद्वत्कुलचूडामणिः श्रीमान् महामहोपाध्यायः डाक्टर गङ्गानाथ झा महोदयः पाठालयप्रधानाध्यक्षपदमलङ्कृतवान् ।

अथ कृतयुग इव पुनः परावर्तिते एतदीये शासनसमये ग्रन्थरत्नमिदं प्रकाशयोग्यतामभजत् ।

प्रीयतां चैतेन मामकीनेन व्यापारेण विद्वज्जनमनःसंमोदसम्पादनद्वारा सर्वान्तर्यामी भगवान् विश्वेश्वर इति प्रार्थयमान आवश्यकवक्तव्यान्तरविरहाद् विरमामि मुधा विस्तरादिति शम् ।

काशीस्थराजकीय-
संस्कृतपुस्तकालयः
(सरस्वतीभवनम्)
काशी

खिस्ते–इत्युपाख्यो
नारायणशास्त्री

। श्रीः ।

# । अद्वैतचिन्तामणेः

## प्रकरणानि ।

## अथ द्वितीयः परिच्छेदः

इति प्रकरणसूची ।

# ॥ अद्वैतचिन्तामणिः ॥

श्रीगणेशाय नमः ॥ श्रीवासुदेवाय नमः ॥

सत्यज्ञानाऽऽनन्दरूपं वासुदेवं जगद्गुरुम् ॥
प्रणम्याऽद्वैतशास्त्रोक्तसिद्धान्तान् सम्प्रदर्शये ॥१॥

विश्वेश्वराऽर्पणबुद्ध्याऽनुष्ठितैः नित्यनैमित्तिकाऽऽदिकर्मभिस्तत्त्वज्ञानप्रतिबन्धककल्मषनिवृत्तिर्जायते, "धर्मेण पापमपनुदति" इति श्रुतेः। ततः परमेश्वरप्रसादाद् विशुद्धाऽन्तःकरणस्य विवेक उत्पद्यते, "आत्मा नित्यः तदतिरिक्तमनित्यम्" इत्यनित्यत्वदोषदर्शनात्। ततो विषयेषु वैराग्यं जायते। ततः शमाऽऽदिसम्पत्तिः। ततो मुमुक्षा। ततः "तरति शोकमात्मवित्" इति श्रुत्या ज्ञानस्य मोक्षसाधनत्वमवगत्य जिज्ञासते। ततः "त्यजतैव हि तज्ज्ञेयम्" इत्यादिशास्त्रात् संन्यासस्य ज्ञानसाधनत्वमवगत्य तदर्थं संन्यस्यति।

ननु ज्ञानार्थं संन्यस्यतीत्यशुद्धम्, अधीतसाङ्गस्वाध्यायस्य गृहीतपदपदाऽर्थसंगतिकस्य संन्यासं विनाऽपि "तत्त्वमसि" "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिवाक्यात् आत्मज्ञानसम्भवात्।

न च चिन्मात्रविषयकं ज्ञानं मोक्षसाधनं, तच्च प्राङ् न वृत्तं, सत्यत्वादिवैशिष्ट्यावगाहिबुद्धेरेव प्राग् जातत्वादिति वाच्यम्। समानाऽधिकरणपदानामेकार्थपरत्वं, विशिष्टयोश्च समानसत्ताकभेदवत्त्वादभेदो बाधितः इत्यादितर्क-

प्रतिसन्धानवतः संन्यासश्रवणाऽव्यतिरेकेणाऽपि लक्षणया चिन्मात्रविषयकज्ञानसंभवादिति चेन्न । प्राथमिकज्ञानस्य चिन्मात्रविषयकस्याऽपि संशयरूपत्वेनाऽविद्यानिवृत्तावसामर्थ्यात् । सर्वमेककोटिकज्ञानं निश्चय एवेति न तत्संशय इति चेन्न । अस्मिन् सिद्धान्ते निश्चयत्वस्य जातित्वात् । तस्याश्चाऽविद्यानिवर्तकज्ञान एव फलबलेनाऽभ्युपगमात् । एककोटिकत्वमात्रस्य निश्चयत्वेऽनभ्यासदशाऽऽपन्नजलज्ञानस्याऽपि निश्चयत्वात्पश्चात्तज्ज्ञाने प्रामाण्यसंशयो न स्यात् । प्रामाण्यसंशयस्यातद्वत्तासंशयपर्यवसन्नत्वात् । तद्वत्तायाश्च जलज्ञानेनैव विषयीकृतत्वात् ।

यत्तु कैश्चिदुक्तम्, " प्रामाण्यं तद्वद्विशेष्यकत्वाऽवच्छेदेन तत्प्रकारकत्वं, विपरीतसमूहाऽऽलम्बनाऽनुरोधात् । तत्रावच्छेद्यावच्छेदकभावस्य प्रागनिर्णयात् प्रामाण्यसंशयः" इति । तन्न, एकस्मिन् धर्मिणि विशेषणद्वये भासमानेऽसति बाधकेऽवच्छेद्यावच्छेदकभावो भासत इति तदुक्तरीत्यैवाऽत्रापि संशयजनकीभूतधर्मिज्ञान एव तद्भानसम्भवात् । अन्यथा गन्धप्रागभावावच्छिन्नो घटो गन्धवानिति बाधस्याऽसङ्कीर्णमुदाहरणं न स्यात् । विशेष्यत्वप्रकारत्वयोरिवाऽवच्छेद्याऽवच्छेदकभावसम्बन्धादीनामपि ज्ञानवित्तिवेद्यत्वाऽभ्युपगमे बाधकाऽभावाच्च । न च संशयाऽनुपपत्तिरेव बाधिका, प्रकारत्वादेर्ज्ञानवित्तिवेद्यत्वत्यागेनाऽपि तदुपपत्तेः । नच निश्चयत्वस्याऽव्याप्यवृत्तित्वाज्जातित्वाऽनुपपत्तिः, सिद्धान्ते संशयरूपाऽविद्यावृत्तेर्भिन्नत्वेनाऽव्याप्यवृत्तित्वाऽभावात् । अनुकूलतर्काभावेनैतादृशनियमाऽभावाच्च ।

अतएवोक्तं नृसिंहाऽऽश्रमगुरुचरणैः " परमते व्याप्यवृत्तित्वं जातेः " इति । तस्मादेककोटिकमप्याद्यं ज्ञानं संशयः । अथ वा निश्चयरूपमेवाऽऽद्यं ज्ञानम् । न चैवं संन्यासाऽऽदिवैयर्थ्यं, यथा नैयायिकादिमते शास्त्राऽध्ययनात् पूर्वमपि 'अहमीश्वरभिन्नोऽहं देहभिन्नः' इति ज्ञानं मनसा जायमानमपरोक्षनिर्णयो भवत्येव, तथाऽपि तत् मिथ्याज्ञानादिनिवृत्तावक्षमं, श्रवणाद्युत्तरकालीनं तु क्षमं, स्वरूपविशेषात् । एवमेव संन्यासात् पूर्वकालीनमस्मन्मते ऽविद्यानिवृत्तावसमर्थं, संन्यासाद्युत्तरकालीनं तु समर्थमिति न कोऽपि दोषः ॥

वस्तुतस्तु प्रतिबद्धत्वादाद्यं ज्ञानं नाऽविद्यानिवर्तकं, श्रवणादिना च प्रतिबन्धकीभूताऽसम्भावनादिनिवृत्तावप्रतिबद्धं ज्ञानमुत्पद्यते ।

तदुक्तं स्कान्दे—"मुख्याधिकारिणां नृणां प्रतिबन्धविवर्जितम् । ज्ञानमुत्पद्यतेऽन्येषां प्रतिबद्धं विजायते" इति ।

ततः कृतसंन्यासः श्रवणार्थं गुरुमुपसर्पति, "तद्विज्ञानार्थं स गुरुमेवाऽभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्"इत्यादिश्रुतेः; "तस्माद् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् । शाब्दे परे च निष्णातं ब्रह्मण्युपशमास्पदम्" इति स्मृतेश्च । ततश्च तदधीनः सन् सर्वेषां वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यं निश्चिनुयेत्थं मनुते ।

तथाहि—वैशेषिकमीमांसकाऽऽदिभिः स्वीकृताः पदार्थाः श्रुतिस्मृतिविरुद्धा युक्तिविरुद्धाश्च । तदुक्तं स्कान्दे-"केचित्प्रधानं त्रिगुणं स्वतन्त्रं केवलं जडम् । अणवः केचिदिच्छन्ति शब्दं केचन मोहिताः ॥ क्षणप्रध्वंसि

विज्ञानं केचन भ्रान्तचेतसः । शून्यसंज्ञं सुराः केचित् निरुपाख्यं विमोहिताः ॥ केचिद् भूतानि चेच्छन्ति निसर्गं केचन भ्रमात् । तत्र तत्रैव तर्कांश्च प्रवदन्ति यथाबलम् ॥ सर्वे वादाः श्रुतिस्मृत्योर्विरुद्धा इति मे मतिः । पापिष्ठानां तु जन्तूनां तत्र तत्र सुरर्षभाः । प्राक्संस्कारवशादेव जायते रुचिरास्तिकी । कर्मणैव समुत्पन्नं समस्तमिति केचन । तच्छ्रुतिस्मृतिवादस्य विरुद्धं मुनिपुङ्गवाः ॥" इति ॥ तथा रामायणेऽयोध्याकाण्डे भरतं प्रति रामचन्द्रवाक्यम्—कच्चिन्न लोकायतिकान्नास्तिकांस्तात सेवसे । अनर्थकुशला ह्येते बालाः पण्डितमानिनः ॥ धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः बुद्धिमान्वीक्षिकीम्प्राप्य निरर्थं प्रवदन्ति ते ॥" इति । एवं च तद्वशान्नाऽद्वैतश्रुतेरन्यार्थता कल्पनीया, किन्तु निर्णीततात्पर्यकश्रुत्यादिविरोधात्त एवाऽप्रामाणिका इति कल्पनीयम् ।

तथाहि—वैशेषिकादिभिरभ्युपगते नवैव द्रव्याणीति नियमे न किञ्चिन्मानम् अन्धकारादेरपि द्रव्यत्वाङ्गीकारे बाधकाऽभावात् । रूपत्वादेः साधकस्य च सत्त्वात् । न च रूपप्रतीतिर्भ्रान्ता, बाधकाऽभावात् । न च मध्यमपरिमाणस्याऽऽरब्धता वाच्या, तथा च स्पर्शशून्यस्य तस्याऽऽरब्धत्वानुपपत्तिः, रूपादिवत्तदुपपत्तेः । न च कार्यद्रव्यस्य स्पर्शवत्त्वनियमः, अप्रयोजकत्वेन नियमाऽसिद्धेः ।

किञ्च द्रव्यत्वं न गुणाश्रयत्वं, रूपादावतिव्याप्तेः । तथाहि—बहूनि रूपाणि, रूपं रसात्पृथक्, इदं रूपं परमिदमपरमित्यादिप्रतीतिः सर्वजनसिद्धा । न चाऽसौ भ्रान्ता, बाधकाऽभावात् अन्यथा घटेऽपि सङ्ख्यादिकं न सिद्ध्येत् ।

नच गुणादौ संख्यावैशिष्ट्यबुद्धिः परम्परासम्बन्धाऽवगाहिनी, वैपरीत्यस्याऽपि सुवचत्वात् । न चाऽऽश्रयैक्यमेव नियामकं, तथा सति जातावेव सङ्ख्याऽऽदिकमस्तु, जातीनां व्यक्त्यपेक्षयाऽल्पत्वेन तन्मात्रे संख्याऽऽद्यभ्युपगमे लाघवात्, नित्यद्रव्यमात्रे वा, अन्यत्र परम्परया तद्वैशिष्ट्यबोधोपपत्तेः । तावताऽपि गुणाश्रयत्वाऽनपायाच्च । नच गुणे गुणाऽङ्गीकारेऽनवस्था, उत्पत्तिसन्तत्यप्रतिबन्धिकायास्तस्या अदोषत्वात् । प्रमेयत्वादेरिवाऽभेदसम्बन्धेन तदभ्युपगमेऽपि बाधकाऽभावाच्च । नच सम्बन्धविशेषेण गुणवत्वं द्रव्यत्वं, तच्च रूपादौ नाऽस्तीति वाच्यम् । स विशेषः समवायश्चेत्तस्याऽपि तत्र सत्वेन पूर्वोक्ताऽतिप्रसङ्ग एव । अन्यश्चेन्न स्वरूपसम्बन्धाऽतिरिक्तः कश्चिन्निर्वक्तुं शक्यः । स्वरूपसम्बन्ध एवाऽस्त्विति चेत्तथाऽपि पूर्वोक्ताऽतिप्रसङ्गः, स्वरूपस्य तत्राऽपि सत्वात् । तस्मात्-

**गुणाश्रयत्वं द्रव्यत्वमिति मन्दप्रतारणा ॥**
**तदनाश्रयभूतस्य पदार्थस्याऽप्रसिद्धितः ॥ १ ॥**

एवं द्रव्याणि नवेत्यप्यनुपपन्नमेव, वायोः पृथिवीविशेषत्वात् । अनुष्णाऽशीतस्पर्शवत्त्वेन तथात्वस्यैवोचितत्वात् । न चाऽपाकजस्पर्शवत्त्वात्ततो भेदः, पृथिवीस्पर्शस्याऽपि तत्परिमाणादेरिव पाकजत्वे प्रमाणाभावात्, सत्वे वा वायुस्पर्शस्याऽपि तथात्वं केन निवारणीयम् । नीरूपत्वादयं न पृथिवीति चेन्न । घ्राणवदनुद्भूतरूपाऽभ्युपगमे बाधकाऽभावात् । न चोद्भूतस्पर्शस्योद्भूतरूपवत्त्वनियमः, तप्तवारिस्थतेजसि व्यभिचारात् । न च प्रत्यक्षत्वाऽप्रत्यक्षत्वाभ्यां भेदः, घ्राणादौ व्यभिचारात् वायोरपि प्रत्यक्षत्वाच्च । नच वायुस्प-

र्श एव गृह्यते, तेन च वायुरनुमीयत इति वाच्यं, घटादेरप्येवं सत्यतीन्द्रियताऽऽपत्तेः। चक्षुषा रूपं गृह्यते, त्वचा स्पर्शो गृह्यते, घटस्त्वनुमीयत इति तत्राऽपि वक्तुं शक्यत्वात्। न च द्रव्यस्य महत्त्वसमानाऽधिकरणोद्भूतरूपवत्त्वं विना बहिरिन्द्रियग्राह्यत्वाऽनुपपत्तिः, उद्भूतस्पर्शवत्त्वमात्रेणाऽपि स्पार्शनप्रत्यक्षत्वोपपत्तेः। अन्यथा द्रव्यप्रत्यक्षमात्रे महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वं प्रयोजकमित्यात्मनोऽप्यप्रत्यक्षत्वं किं न स्यात्। न च वायुरयं न पृथिवीति महाजनानां व्यवहारबाधः, महाजनानां 'वयं मनुष्याः' इति व्यवहारस्येवाऽस्यापि भ्रमत्वे बाधकाऽभावात्, लाघवरूपबाधकसत्त्वाच्च तस्मात्—

न वायोः पृथिवीभेदे साधकं मानमस्ति वः।
अभेदसाधकं तूक्तं स्पर्शसाम्यं च लाघवम् ॥२॥

एवमाकाशदिक्कालानामीश्वरभेदे प्रमाणाऽभावादपि न नवैवेति नियमः, ईश्वरेणैव तत्कार्यनिर्वाहात् शब्दनिमित्तकारणतया क्लृप्तस्य तस्यैव समवायिकारणताऽभ्युपगमे लाघवाच्च। न च धर्मिग्राहकमानेन तेषां भेदसिद्धावीश्वरेण नाऽन्यथासिद्धिरिति वाच्यम्, धर्मिग्राहकमानं हि लाघवतर्कसहकृतं सत् क्लृप्तमीश्वरमेव विषयीकरोति, न त्वक्लृप्तं कालादि। तस्मात्—

नेश्वराद्भिन्न आकाशः,
कालश्चाऽस्ति तथा ककुब्।
स एव सर्वकर्तृत्वात्
तैः कर्तव्यं करिष्यति ॥३॥

एवं मनःसत्त्वे प्रमाणाभावादपि न नव । नचव्यासङ्गा-ऽन्यथानुपपत्त्या तत्सिद्धिः, अदृष्टविशेषेण बुभुत्सया वा तदुपपत्तेः । अन्यथा यदा मनश्चक्षुषा संयुक्तं, तदा श्रोत्रेण किं न संयुक्तं, तस्मात्तत्राऽगत्याऽदृष्टस्यैव नियामकत्वाऽभ्युपगमे तेनैव व्यासङ्गोपपत्तौ किं मनसा ।

ननु सुखाद्युपलब्धिः करणसाध्येत्यनुमानात्तत्सिद्धिरिति चेन्न । चक्षुरादिनाऽर्थान्तरात् । नच चक्षुषो रूपादिमद्वस्तुग्राहिणस्तत्राऽसामर्थ्यं, एकेनैवेन्द्रियेण तत्तद्गोलकाऽवच्छेदेन रूपादिग्रहोपपत्तौ करणनानात्वे प्रमाणाभावात् । तथाहि—चक्षुरेव सङ्कोचविकासशीलं नयनगोलकद्वारा निःसृतं सत् रूपादिकं गृह्णातु, कर्णशष्कुल्यवच्छिन्नं सच्छब्दं, सर्वशरीरव्यापि सत् स्पर्शं, नासाग्राऽवच्छिन्नं सद्गन्धं, जिह्वाग्रावच्छिन्नं सद्रसं गृह्णातु, अनवच्छिन्नं सदेव सुखदुःखादिकम् । एवं च चक्षुषैव सकलग्रहोपपत्तावनेकेन्द्रियकल्पने प्रमाणाऽभावः । न चा ऽविनिगमः, संकोचविकासशीलत्वेन वेगवत्त्वेन च चक्षुष एव तत्स्वीकारौचित्यात् । न चैकस्याऽवच्छेदकभेदेन ग्राहकत्वाऽग्राहकत्वं न दृष्टमिति वाच्यम् । एकस्या एव त्वचश्चक्षुर्गोलकाऽवच्छेदेन धूमस्पर्शग्राहकत्वं नाऽन्यावच्छेदेनेति त्वयाऽभ्युपगमात् । न चैवं जन्माऽन्धस्याऽपि रूपग्रहाऽऽपत्तिः, स्पर्शग्रहोऽपि वा न स्यादिति वाच्यम् । त्वन्मते बधिरस्याऽदृष्टविशेषोपगृहीतकर्णशष्कुल्यभावाच्छब्दाऽग्रहवददृष्टविशेषोपग्रहाऽभावादेव स्पर्शग्रहेऽपि तदग्रहोपपत्तेः । तस्मात्—

एकस्यैवेन्द्रियस्येह नानाऽवच्छेदभेदतः ।
तत्तद्ग्रहणसामर्थ्यं नानेकं कल्पयेद् बुधः ॥ ४ ॥

तस्मान्नवैव द्रव्याणीत्ययुक्तम् ।

एवं चतुर्विंशतिर्गुणा इत्यप्ययुक्तम्, त्वया गुणे सङ्ख्याऽनभ्युपगमात् । औपचारिकोऽयं शब्दप्रयोगः, परम्परया सङ्ख्यासत्त्वाद्वा तथा व्यवहार इति चेन्न । तथा सति चतुर्विंशतिगुणा इति नियमाऽनुपपत्तेः । परार्धं गुणा इति ज्ञानस्य प्रमात्वाऽऽपाताच्च । किञ्च संयोगाऽभावातिरिक्त विभागे प्रमाणाऽभावान्न चतुर्विंशतिः, न च विनिगमकाऽभावादुभयोरपि भावत्वम्, कपालसंयोगादेर्घटादिकारणतया भावकारणत्वे लघुत्वस्यैव विनिगमकत्वात् । नच शब्दकारणीभूतविभागस्याऽपि भावत्वे लाघवं, विभागस्य शब्दकारणत्वे प्रमाणाऽभावात् । वंशदलादिक्रियाव्यवहितक्षणोत्पत्तिकसंयोगादेव शब्दोत्पत्तेः । भेर्याकाशसंयोगस्य शब्दकारणतया तत्सजातीयसंयोगस्यैव कारणतौचित्यात् । नन्वादौ वंशदलादौ क्रिया, ततो विभागः, ततः पूर्वदेशसंयोगनाशः; तत उत्तरदेशसंयोगोत्पत्तिः न तु क्रियाव्यवहितोत्तरक्षणे इति चेन्न । अत्र प्रमाणभूतमन्वादिवचनाभावात् । विभागपूर्वदेशसंयोगनाशोत्तरदेशसंयोगानामेकक्षणोत्पत्तिकत्वे बाधकाभावात् । अन्यथा क्रियाचतुर्थक्षणे विभागः, तच्चतुर्थक्षण एव पूर्वसंयोगनाश इति वदन्तं कः समादध्यात् । तस्मान्न संयोगाऽभावातिरिक्तो विभागः ।

एवमन्योन्याऽभावाऽतिरिक्ते पृथक्त्वे ज्येष्ठत्वकनिष्ठत्व संनिहितत्वविप्रकृष्टत्वाऽतिरिक्तयोः परत्वाऽपरत्वयोः ज्ञाना-

तिरिक्तद्वेषादौ च प्रमाणाऽभावादपि नाऽयं नियमः। नच ज्ञानद्वेषशब्दयोः पर्यायताऽऽपत्तिरतस्तयोर्भेदः, तथात्वे लज्जाश्रद्धाभयधैर्यादेरपि गुणाऽन्तरताऽऽपत्तेः। तेषां च ज्ञानविशेषत्वे किमपराद्धं द्वेषादिना।

एवं ज्ञानादीनां द्विक्षणावस्थायित्वनियमोऽप्यप्रामाणिकः, घटादेरिव तस्याऽपि प्रहरपर्यन्तमवस्थाने बाधकाभावात्। 'आप्रहरं घटमेवाऽनुभवन्नासम्' इति प्रतीतेर्लाघवसहकृतायाः साधकत्वाच्च। नच प्रत्यक्षाऽऽत्मविशेषगुणानामुत्तरोत्तरस्य पूर्वपूर्वविरोधित्वादुत्तरज्ञानेन तन्नाशः, एतादृशविरोधिताकल्पने प्रमाणाऽभावात्। अन्यथा पदार्थमात्रस्योत्तरोत्तरस्य पूर्वपूर्वविरोधित्वनियमात् सर्वं क्षणिकमिति वदन्तं को निवारयेत्।

एवमात्मविशेषगुणानां क्रमिकत्वनियमाऽभिधानमपि निष्प्रमाणं, हस्तपादाद्यवच्छेदेन युगपदेव सुखदुःखे अनुभवामीति प्रतीतेः। न चैवं यौगपद्यांशे भ्रान्तौ, बाधकाऽभावात्। गुणमात्र इवात्राऽप्यनियमेन एतस्य प्रक्रियामात्रत्वात्।

एवं शब्दस्य द्विक्षणावस्थायित्वाऽभिधानमपि निर्युक्तिकम्। एकस्यैव शब्दस्य गव्यूत्यादिदेशव्यापिनश्चिरकालाऽवस्थायिनश्चोत्पत्तौ बाधकाऽभावात्। यः शब्दस्त्वया श्रुतः स एव मयाऽपीत्यादिसाधकसत्त्वाच्च। अन्यथा मेघादिशब्दानां जन्मसहस्रेणाऽप्यग्रहप्रसङ्गाच्च।

एवं पृथिवीस्पर्शस्य पाकजत्वमपि निष्प्रमाणम्। यत्तु तस्याऽपाकजत्वे गोचाण्डालादिस्पर्शस्य विधिनिषेधौ न स्यातामिति, तन्न। तथा सति गङ्गास्पर्शादिविध्यनुरोधेन ज-

त्स्पर्शस्याऽपि पाकजताऽऽपत्तेः। तत्र स्पर्शशब्दस्य संयोगव-चनतयैतस्यशब्दश्लेषमात्रत्वाच्च । नच स्पर्शस्याऽपाक-जत्वे कोमलद्रव्ये पाकेन काठिन्यं न स्यादिति वाच्यम्। काठिन्यकोमलत्वयोः संयोगविशेषत्वात्। अन्यथा चाक्षुष-त्वायोगात्। एतच्च लीलावत्यादौ स्फुटम् । अतएव कर-कादौ काठिन्योपलम्भोऽपि सर्वसिद्ध एवेति।

एवं द्वित्वादेरपेक्षाबुद्धिजन्यत्वाऽभिधानमपि न युक्ति-सहम्। तस्यास्तद्व्यञ्जकतयाऽप्युपपत्तावेकत्ववैलक्षण्ये बी-जाऽभावात् । अनेकद्वित्वाद्युत्पत्तौ गौरवाच्च । अन्यथा ह्रस्वत्वदीर्घत्वादेरप्यवधिज्ञानं जनकमेवेति वदन्तं कः समादध्यात्। किं बहुना, अङ्गसङ्गिसलिलशैत्याऽभिव्यञ्ज-कपवनादेरपि शैत्योत्पादकतैव स्यादिति साधु समर्थितं तन्त्ररहस्यम्।

एवं द्रवत्वस्य तेजोवृत्तित्वमपि निष्प्रमाणम्। ननु ध्मायमाने कनके ऽत्यन्ताऽनलसंयोगे सत्यपि पीतरूपद्रव-त्वयोरनुच्छित्तिर्दृश्यते, सा चाऽसति विरोधिद्रवद्द्रव्य-सम्बन्धे ऽनुपपन्ना, पार्थिवद्रव्ये ऽत्यन्तानलसंयोगे रूपाऽऽ-दिपरावृत्तेरावश्यकत्वात्। तच्च विरोधिद्रव्यं, सांसिद्धिकद्र-वत्वशून्यत्वे सति रूपवत्वात् तेज एवेति सिद्धम्। द्रवत्वस्य तेजोवृत्तित्वमिति चेन्न । तेजसो रूपपरावृत्तिप्रतिबन्धक-त्वे घटेऽपि पाकेन रूपपरावृत्तिर्न स्यात । तेजोवि-शेषः प्रतिबन्धको न सर्वं तेज इति चेन्न । पार्थिव-विशेषस्यैव प्रतिबन्धकत्वोपपत्तौ तत्र तेजोऽन्तरकल्पने, तस्य नैमित्तिकद्रवत्वादिकल्पने च प्रमाणाऽभावात नैमि-त्तिकद्रवत्वस्य पृथिवीत्वव्याप्यत्वाच्चेति।

एवं पारिमाण्डल्यं क्वाऽपि कारणं नेत्यपि न। वायौ रूपाऽत्यन्ताभावस्येव तस्मिन्नपि महत्त्वाऽत्यन्ताऽभावस्य प्रत्यक्षत्वेन तत्र प्रत्यक्षे प्रत्यासत्तिविधया तस्य हेतुत्वात्।

एवं घटपटोभयनिरूपितसंयोगस्यैकत्वमप्ययुक्तम्। अन्योन्याऽभावस्येव तद्भेदस्यैवोचितत्वात्। 'सम्बन्धिताऽवच्छेदकभेदेन ससम्बन्धिकपदार्थो भिद्यते' इति परैणाऽभ्युपगमात्। न चाऽऽश्रयकर्मत्वेन कारणत्वे श्येनकर्मणा वृक्षे संयोगस्य प्रतियोगिकर्मत्वेन कारणत्वे वृक्षनिरूपितसंयोगस्य श्येनेऽनुपपत्तेर्निरूपककर्मत्वेनैव कारणत्वादुभयनिरूपितः संयोग एक एवेति वाच्यम्, कर्मत्वेन सामान्यकारणता तत्त्वेन विशेषकारणतेत्यभ्युपगमे बाधकाऽभावात्।

एवं संयोगजसंयोगो ऽप्यप्रमाणकः। युगपदुभयत्राऽपि संयोगोत्पत्तिसंभवेन तादृशप्रणाल्यां बीजाऽभावात्। न-चाऽस्मिन्नवोत्पन्ननिष्क्रियघटादौ संयोगजसंयोग आवश्यकः, तेन विना 'घटोभूतलसंयुक्तः' इति प्रतीत्यनुपपत्तिरिति वाच्यम्। परम्परासम्बन्ध्यवयवसंयोगेनाऽपि रूपादौ संख्याप्रत्ययवत्तदुपपत्तेः। अन्यथा संयोगे कर्मजन्यतावच्छेदिका एका जातिः, संयोगजन्यताऽवच्छेदिका ऽपरेति जातिद्वयकल्पनागौरवात्। एवं विभागजविभागोऽपि।

एवं चित्ररूपस्य रूपान्तरस्वीकारोऽपि निष्प्रमाणकः, नानारूपसमाहारस्यैव चित्ररूपत्वात। नच व्याप्यवृत्तिजातीयस्याऽव्याप्यवृत्तित्वं विरुद्धम्। गुणत्वादिना व्याप्यवृत्तिजातीयस्याऽपि संयोगसुखादेरव्याप्यवृत्तिताऽभ्युपगमवद्वान्तरजात्या व्याप्यवृत्तिजातीयस्याऽपि ज्ञानादेस्तदभ्युपगमवच्चैतस्याऽपि प्रमाणबलादव्याप्यवृत्तिताऽभ्युपगमे बाध-

काऽभावात् । न च रूपस्याऽन्यत्राव्याप्यवृत्तित्वं न दृष्टमिति वाच्यम्, अन्यत्राऽदर्शनेऽप्यत्रैव प्रमाणबलेनाऽभ्युपगमे बाधकाऽभावात् । अन्यथा, अन्यत्राऽदृष्टं शुक्लभास्वरं तेजसि, सांसिद्धिकद्रवत्वं जले, इत्यादि न सिद्ध्येत् ।

किं चैवं चित्ररूपवच्चित्रं ज्ञानमपि किं नाङ्गीकुरुषे, अनेकेन्द्रियजन्ये प्रमाणद्वयजन्ये च ज्ञाने चाक्षुषत्वाद्ययोगात् । एवं चित्रो गन्धः, चित्रो रसः, इत्याद्यपि सिद्ध्येत् । चित्ररसा हरीतकीत्यादिव्यवहारात् । तत्राऽऽश्रयोपाधिकश्चेत्तुल्यस्प्रकृतेऽपि । तस्मात्–

लज्जादेर्ज्ञानतो भेदात् पृथक्त्वादेरभावतः ॥
गुणेयत्ताऽऽद्युपन्यासः केवलं शिष्यबन्धनम् ॥५॥

तस्माच्चतुर्विंशतिगुणा इत्याद्ययुक्तम् ।

एवं कर्माणि पञ्चेत्यपि न युक्तिमत् । भ्रमणरेचनादेरप्यधिकस्य सत्त्वात् । तस्य गमनविशेषत्वे उत्क्षेपणादिकमपि गमनविशेषएवाऽस्तु । नचाऽऽकुंचनादौ गमनव्यवहाराऽभावात्तद्भेदः, भ्रमणादेरपि ततो भेदाऽऽपत्तेः । व्यवहाराऽभावस्य तुल्यत्वात् । तस्मात्–

भ्रमणं गतिभेदश्चेद्वदाऽवक्षेपणेन किम् ।
अपराद्धमतः सर्वे त्वत्सिद्धान्ताः कुयुक्तिकाः ॥६॥

एवं कर्मणो व्याप्यवृत्तित्वनियमोऽप्यप्रामाणिकः, एकदेशे पटश्चलतीति प्रतीतेः । न चाऽसाववयवगतं कर्मैव विषयीकरोति, न पटगतमिति वाच्यम्, पटत्वसामानाधिकरण्येन कर्मणो विषयीकरणात् । अन्यथा वृक्षादौ संयोगोऽपि न सिद्ध्येत् । 'वृक्षः संयुक्तः' इति प्रतीतेरवयवसंयोगेनाऽप्यु-

पपादयितुं शक्यत्वात् । तस्मात्संयोगवत्कर्माऽप्यव्याप्यवृत्त्येवेति ।

एवं सामान्यपदार्थोऽपि न सप्रमाणकः । न चाऽनुगतप्रतीत्या घटत्वाऽऽदिसामान्यसिद्धिः, प्रतीतेरनुगतत्वमेकत्वविषयत्वं चेत्तदसिद्धमेव । व्यक्त्यैक्यं चेद् 'घटपटस्तम्भाः' इति समूहाऽऽलम्बनात् त्रित्वैकसामान्यसिद्ध्यापत्तिः। तच्च घटत्वादेर्व्यापकं, पृथिवीत्वादेर्व्याप्यमित्यभ्युपगमे परापरभावस्याऽऽप्युपपत्तेः । प्रतियोगित्वाऽनुयोगित्वाद्यनुगतबुद्धौ व्यभिचाराच्च न तस्या जातिसाधकत्वम् । नाऽपि कारणतावच्छेदकत्वादिना जातिसिद्धिः, कारणत्वादेस्तत्तत्स्वरूपत्वपर्यवसानेन तत्राऽनुगतावच्छेदकाऽनपेक्षणात् । नाऽपि पदशक्यतावच्छेदकत्वेन, तथात्वेऽदृष्टपदशक्यतावच्छेदकत्वेनादृष्टत्वस्याऽपि जातित्वाऽऽपत्तेः । तच्चाऽसम्मतम्परस्य । न चाऽनुगतजात्यनङ्गीकारेऽपूर्वघटादौ शक्तिग्रहाऽभावात्तद्बोधाऽनुपपत्तिः, 'प्रतियोगि इदम्' इत्यादिपदादिवत्तदुपपत्तेरिति ।

एवं जातिसङ्करस्य दूषकताऽभ्युपगमोऽपि दुराग्रहमूलकः, उपाधिसङ्करतुल्यत्वात्तस्य । न चैवमश्वत्वेन गोत्वाऽभावानुमानं न स्यात, तयोरपि सङ्करसम्भवादिति वाच्यम् । उपाध्योः साङ्कर्ये शरीरत्वेनेन्द्रियत्वाऽभावाऽनुमानं न स्यादित्यपि तुल्यत्वाच्च । तस्मान्न सामान्यपदार्थादौ प्रमाणम् ।

एवं च विशेषपदार्थाऽभ्युपगमोऽपि मुधा । न च तदभावे समानगुणक्रियेषु परमाणुषु व्यावृत्ति बुद्धिर्न स्यादिति वाच्यम्, तेषामपि व्यावृत्त्यर्थं पदार्थान्तराऽभ्युपगमाऽऽपत्तेः ।

न च ते स्वत एव व्यावृत्ताः स्वरूपविशेषादेवेति वाच्यम् । परमाणुष्वेव तादृशस्वरूपाऽभ्युपगमेन व्यावृत्तिसिद्धेः किमेतैः । तस्मात्–

**विशेषाणां स्वरूपेण व्यावृत्तत्वं यथेष्यते ।**
**तथैव नित्यद्रव्येषु व्यावृत्तत्वं विनैव तैः ॥ ७ ॥**

एवं समवायाऽभ्युपगमोऽपि वृथैव । तेन विनाऽपि क्लृप्तैर्गुणगुण्यादिस्वरूपैरेव विशिष्टबुद्ध्युपपत्तेः । न चैकस्य विशिष्टधीनियामकत्वे लाघवमिति तदभ्युपगमः, तथात्वे ऽभावविशिष्टधीनियामकत्वेन वैशिष्ट्याऽऽख्यपदार्थान्तराऽभ्युपगमाऽऽपत्तेः । न च वैशिष्ट्यस्यैक्याद् घटवति तदभावबुद्धेः प्रमात्वाऽऽपत्तिः । स्वरूपस्येव वैशिष्ट्यस्याऽपि तदानीं तत्र सम्बन्धत्वाऽभावात् । यदि च क्लृप्तरूपैरेवोपपत्तेर्नातिरिक्तवैशिष्ट्याऽभ्युपगमः, तर्हि समं समवायेऽपि । किञ्च समवायाऽभ्युपगमे आत्मनि रूपं, घटे दुःखं, उष्ट्रे गोत्वं इत्यादि स्यात्, तत्तत्समवायस्य तत्र सत्वात् । न च समवायमात्रं तिष्ठति न तु ते पदार्था इति वाच्यम्, तेषां स्थितिनियामकसम्बन्धे सति तदभावायोगात् । नच तेष्वधिकरणेषु स्थितिनियामकत्वं न तस्येति वाच्यम्, स्वरूपसम्बन्धरूपनियामकत्वस्य स्वरूपादनतिरिक्तत्वेन तस्याऽपि सत्वात् । अन्यथा नित्यपदार्थेषु विशेषनिरूपितः समवायोऽस्ति, नतु विशेषा इत्यपि स्यात् । 'घटे रूपम्' इतिवत्तेषामननुभवात् । नच तेऽपि योगिभिरनुभूयन्त एवेति वाच्यम् । योगिनां तदनुभवे प्रमाणाऽभावात् । सत्वे वा त एव शपथं पृच्छ्यन्तां, किमेतेऽपि तैरनुभूयन्ते न वेति । नच

विशेषाणां तत्रावृत्तौ व्यावृत्त्यनुपपत्तिः, तन्निरूपितसमवा-
येनाऽपि तदुपपत्तेः । तस्मात्–

**विशिष्टबुद्धेः क्लृप्तेन स्वरूपेणैव सम्भवात् ।**
**समवायाऽभ्युपगमः परस्याऽयमहो मुधा ॥८॥**

एवमभावपदार्थाऽभ्युपगमोऽपि निर्मूलः । तथाहि–यथै-केनैव घटस्वरूपेणायम्प्रतियोगी, अनुयोगी, विशेष्यो, वि-शेषणं, उद्देश्यो, विधेयो, देवदत्तीयो, यज्ञदत्तीय इत्यादि व्यवहाराः परैर्निर्वाह्यन्ते, तथैवाऽभावव्यवहारोऽप्यधि-करणस्वरूपेणैव तत्तदधिकरणनिष्ठैः पदार्थैर्वा निर्वा-ह्यताम् । तत्तद्देशकालाऽवच्छेदेन विद्यमानेषु तत्तत्प्रति-योगिकत्वमात्रकल्पने लाघवात् किम्पदार्थाऽन्तरेण । न-चाऽधिकरणस्यैवाऽभावत्वे घटकालेऽप्यभावप्रतीतेः प्रमा-त्वाऽऽपत्तिः । अतिरिक्ताऽभावाऽभ्युपगमेऽपि तुल्यत्वात् । अत्यन्ताऽभावस्य त्रैकालिकत्वेन निष्क्रियत्वेन च घटव-त्यपि तस्य सत्वात् ।

न च तदानीमधिकरणत्वेन संमतस्य सम्बन्धो नाऽस्तीति वाच्यम्, त्वदभ्युपगतस्वरूपसम्बन्धस्य स्वरू-पात्मकस्य तदानीमपि सत्वात् । न च प्रतियो-गिदेशाऽन्यदेशत्वं सम्बन्धः, तस्य स्वरूपादतिरेके क्लृप्तपदार्थाऽनन्तर्भावात्, अनतिरेके चोक्तदोषात् । किञ्च यत्किञ्चित् प्रतियोगिदेशाऽन्यदेशत्वस्य घटवत्यपि सत्वात्तत्राऽपि तदत्यन्ताऽभावाऽऽपत्तिः । स्वप्रतियो-गिदेशाऽन्यदेशत्वं चाऽऽकाशाऽत्यन्ताऽभावादावप्रसिद्धम् । वस्तुतस्तु प्रतियोगिदेशाऽन्यदेशत्वस्य सम्बन्धत्वे घट-

वति तदत्यन्ताऽभावबोधोऽपि प्रमा स्यात्, सम्ब-
न्धस्य सत्त्वात् । तत्र प्रतियोगिदेशान्यदेशत्वं नास्तीति
चेन्न । अन्योऽन्याभावस्यापि सत्त्वात् । तथाऽप्यन्योऽन्या-
ऽभावसम्बन्धोऽस्मिन्नधिकरणे नास्तीति चेन्न । अन्यो-
ऽन्याभावसम्बन्धो हि प्रतियोगितावच्छेदकदेशाऽन्यदेशत्वं,
तदपि तिष्ठत्येव । नन्वत्राऽत्यन्तोऽन्याभावः प्रविष्टः, तत्स-
म्बन्धो नास्तीति चेन्न । तत्सम्बन्धो हि तत्प्रतियोगिता-
ऽवच्छेदकदेशाऽन्यदेशत्वं, तदपि तिष्ठत्येव । एवमुत्तरोत्तर-
मपीति तद्वति तदभावबुद्धेः प्रामाण्यं दुष्परिहरम् । एतेन
विषयाऽनवस्था दोषायैव न, ज्ञप्तिप्रतिबन्धिकाऽनवस्था ना-
स्त्येव, तत्ताऽवच्छेदकस्य प्रत्यक्षाऽविषयत्वादिति निरस्तम् ।
घटवति तदभावबुद्धेः प्रमात्वस्यैवाऽऽपाद्यमानत्वादिति ।
किञ्चैवं घटाऽपसारणाऽनन्तरं तदधिकरणं घटाऽन्ताभाववन्न
स्यात् । त्वन्मते ऽन्योन्याऽभावस्य व्याप्यवृत्तित्वेन तस्मिं-
स्तदन्योऽन्याभावाभावेन तस्याऽधिकरणस्याऽभावेन
सम्बन्धाऽभावात् । न च स्वरूपात्मकोऽपि फलबल-
कल्प्यः स्वरूपसम्बन्धस्तदानीं नास्तीति वाच्यम् । अति-
रिक्ताभावाऽनभ्युपगमेऽप्येतादृशसमाधाने दुर्भिक्षाऽभा-
वात् । न चाऽननुगतैरधिकरणस्वरूपैरनुगताऽभावप्रतीत्य-
नुपपत्तिः । अननुगतस्वरूपैरुद्देश्यत्वविधेयत्वाऽऽद्यनुगत-
बुद्धेरिवास्यापि सम्भवात् प्रतीतेरनुगतत्वस्य निर्वक्तु-
मशक्यत्वाच्च । घटो घटाऽन्योन्याभावो न, पटो घटा-
ऽन्योऽन्याऽभावो नेत्याद्यनुगतबुद्धावनुगतविषयत्वस्य परे-
णाऽप्यनभ्युपगमाच्च । अन्योऽन्याभावस्य तत्तद्भावस्वरूप-
ताऽभ्युपगमात् ।

किञ्चाऽस्तु नामाऽभावः, तथापि तच्चातुर्विध्ये प्रमाणा-
भावः । तथाहि–समयविशेषसंसर्ग्यत्यन्ताऽभावेनैव, सर्व-

व्यवहारोपपत्तौ किं प्रागभावध्वंसाभ्याम् । न च प्रागभावाऽभावे भविष्यतीति प्रतीत्यनुपपत्तिः, तस्या उत्पत्तेर्भविष्यत्कालसम्बन्धावगाहितया प्रागभावाऽविषयत्वात् । किञ्च यथा प्रागभाव एव कदाचित् कपालेषु घटो नास्तीति, कदाचिद् घटो भविष्यतीति प्रतीयते । यथा वा ध्वंस एव कदाचिद् घटो ध्वस्त इति, कदाचिद् घटो नास्तीति । एवमत्यन्ताभाव एव कदाचिद् भविष्यतीति, कदाचिन्नास्तीति, कदाचिद् ध्वस्त इति प्रतीतेर्विषयोऽस्तु । एवं भूतले घटो ध्वस्त इति प्रतीतिरपि संगच्छते । न चैकस्य कालभेदेन विचित्रप्रतीतिनिर्वाहकताऽनुपपत्तिः, तथात्वे वा घटोत्पत्तेः पूर्वमपि घटो ध्वस्त इति प्रतीत्यापत्तिरिति वाच्यम्, यथा स्वरूपाऽऽत्मिकाऽपि 'दण्डी देवदत्तः' इति बोधे दण्डस्य विशेषणतैव न विशेष्यता, 'देवदत्ते दण्डः' इति बोधे दण्डस्य विधेयतैव नोद्देश्यता निर्वाह्यते, दण्डस्वरूपेण, तथैवाऽत्राऽप्यभ्युपगमे बाधकाऽभावात् । अस्तु वा ध्वस्त इति विलक्षणप्रतीत्यनुरोधेन ध्वंसः, प्रागभावस्तु निष्प्रमाण एव । यत्तु प्रागभावाऽनभ्युपगमे उत्पन्नोऽप्युत्पद्येतेति, तन्न । उत्पन्नस्यैव प्रतिबन्धकत्वात् । एवमुक्तेऽपि देवदत्ते श्वोभाविघटध्यानस्याऽहनिनिध्यानस्य चेदानीमेवोत्पत्त्याऽऽपत्तेस्तुल्यत्वाच्च । तत्र प्रागभावस्याऽपि सत्त्वात् कालविशेषोऽपि तत्राऽपेक्ष्यत इति चेत्, तर्हि तदभावादुत्पन्नस्याऽनुत्पत्तौ किं प्रागभावेन । न चैवं कालमात्रस्य कारणताऽऽपत्तिः, एककालोत्पन्नकार्यवैचित्र्यार्थं कारणान्तरस्याऽऽवश्यकत्वात् । सामग्रीभेदं विना कार्यभेदाऽयोगात् ।

एवमन्योऽन्याभावोऽपि नाऽतिरिक्त आवश्यकः, घटत्वाद्यत्यन्ताऽभावेनैव 'घटो न' इत्यादिप्रतीतेर्निर्वाहात्। न च घटत्वाऽत्यन्ताऽभावज्ञाने घटत्वज्ञानं कारणं, तत्र घटाऽन्यावृत्तित्वादिगर्भमित्यात्माश्रयापत्तिरिति वाच्यम्, 'घटः' इति प्रतीतिप्रकारत्वादेरेव घटत्वत्वेनाऽऽत्माश्रयाद्यनवकाशात्। वस्तुतस्तु फलीभूते बोधे प्रतियोगिदिशि यो धर्मः प्रकारतया भासते, तत्प्रकारकं प्रतियोगिज्ञानमभावज्ञाने कारणमिति घटत्वप्रकारकघटबुद्धौ सत्यां तदत्यन्ताऽभावबोधो निष्प्रत्यूहः। निष्कर्षस्तु—स एवाऽभावो यदा घटत्वाऽवच्छिन्नघटप्रतियोगिकत्वेन प्रतीयते, तदा भूतलं घटो नेति प्रतीतेरुल्लेखः, यदा घटत्वत्वाऽवच्छिन्नघटत्वप्रतियोगिकत्वेनाऽनुभूयते तदा भूतले घटत्वं नास्तीत्युल्लेख इति नाऽन्योन्याऽऽश्रयादिलेशोऽपीति न काऽप्यनुपपत्तिः।

**तस्मात् स्वरूपसम्बन्धैः सर्वप्रत्ययसम्भवे।**
**भावाद्विलक्षणाऽभावस्वीकारो भ्रममूलकः ॥९॥**

एवं योग्याऽनुपलब्धिरप्यभावग्राहिकेत्यपि मन्दम्। प्रमेयत्वादिग्रहे व्यभिचारेण भावग्रहे ऽभावानुपलब्धेरिवाऽभावग्रहेऽपि भावानुपलब्धेरहेतुत्वात्। न चैवं घटप्रत्ययाऽनन्तरमपि तत्र तदभावग्रहः स्यादिति वाच्यम्, किं भ्रम आपाद्यते, उत प्रमा? आद्ये दोषाऽभावादित्युत्तरम्, अन्त्ये विषयाऽभावादिति। न च पाषाणे घटभ्रमदशायां तदभावप्रमाऽऽपत्तिः, तत्र भ्रमजनकदोषस्यैव प्रतिबन्धकत्वात् गुणाऽभावाद्वा तदभावोपपत्तेः। अन्यथा भ्रमपूर्वक्षणे घटाऽभावग्रहः किमिति न भवेत्। किञ्चाऽनुपलब्धे

योग्यत्वं, तर्कितप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वम्, एवञ्च स्तम्भे यदि पिशाचत्वं स्यात् तर्हि योग्यव्यक्तिवृत्ति स्यात् तथा चोपलभ्येतेतिवत् परमाणुर्यदि महान् सन् भूतलवृत्तिः स्यात् तर्ह्युपलभ्येतेत्याद्यापादनसम्भवेनाऽभावे योग्यायोग्यविभागो न स्यात्। यत्किञ्चिद्विशेषणप्रक्षेपेण सर्वत्रैतादृशाऽऽपादनसम्भवात्। तस्मान्न किञ्चिदेतत्।

एवं द्रव्यादिपदार्थेषु खण्डितेषु तद्घटितानि सर्वाणि निर्वचनानि खण्डितप्रायाण्येव। किंच परोक्तानि सर्वाणि लक्षणानि कालकालोपाधिदिग्दिगुपाधिष्वतिव्याप्तानि। यत्तु स्वरूपसम्बन्धविशेषेण तत्र तानि न सन्तीति, तन्न। स्वरूपसम्बन्धस्य स्वरूपाऽऽत्मकतया तस्याऽपि सत्त्वात्। अतिरिक्तत्वे वा सोऽप्यस्त्येव कालादेः सर्वाऽऽधारत्वादपसिद्धान्तश्च, क्लृप्तपदार्थेषु तस्याऽनन्तर्भावात्। दृष्टान्ताऽऽदौ तदन्तर्भावे वा एकएव पदार्थोऽस्तु, किं षोडशपदार्थाऽऽदिपरिकल्पनया। किञ्च स्वरूपस्य सम्बन्धत्वे सर्वाऽपि प्रतीतिः प्रमा स्यात्, शुक्तावपि स्वरूपसम्बन्धेन रजतत्वादेः सत्त्वात्। न चैवं नेदं रजतमिति बाधाऽनुपपत्तिः, परम्परासम्बन्धेन रक्तरूपवत्यपि स्फटिके नाऽयं लोहित इतिवत् समवायसम्बन्धेन रजतत्वाऽभावान्नेदं रजतमिति बाधोपपत्तेः। तस्मात्—

जगदाधारता त्याज्या कालादीनां त्वयाऽथवा।
कार्या वेदान्तसिद्धान्तपादसेवा गतत्रपम् ॥१०॥

अनयैव दिशा भाट्टाद्यभिमताः पदार्था अपि निरस्ता वेदितव्याः। नन्वेवं पदार्थखण्डने स्वसिद्धान्ता अप्युच्छिद्येरन्निति चेन्न। अस्माकमेतादृशप्रक्रियायामाग्रहा-

ऽभावात्। तदुक्तं सुरेश्वराऽऽचार्यैः—"यथा यथा भवेत् पुंसो व्युत्पत्तिः प्रत्यगात्मनि। सा सैव प्रक्रिया ज्ञेया साध्वी सा चाऽनवस्थिता" इति। तथा नृसिंहाऽऽश्रमगुरुचरणैरप्युक्तम्, 'युष्माभिरेव निपुणैः सुविचार्य एष येषां महाकृतिरियं व्यवहाररक्षा। अस्माकमद्य निजरूपमभीप्सतां किं स्वप्नोपमव्यवहृतेः परिरक्षणेन' इति। अन्यैरप्यभियुक्तैरभिहितम्,- "प्राचीनै र्व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ परं, सन्नह्यद्भिरनादरात्सरणयो नानाविधा दर्शिताः" इति। किन्तु श्रुतिस्मृत्यनुरोधेनैवाऽस्माकं पदार्थाऽभ्युपगमः, केवलं कुतर्केण पदार्थनिर्णयाऽयोगात्, वेदैकगम्यब्रह्माऽऽदिनिर्णयस्य तु सुतरामयोगात्। तदुक्तं महाभारते आरण्यके पर्वणि—"शुष्कतर्कं परित्यज्य आश्रयस्व श्रुतिं स्मृतिम्। एकाक्षराभिसम्बद्धमस्थं हेतुभिरिच्छसि। बुद्धिर्न तस्य सिद्धयेत साधनस्य विपर्ययात्" इति। तस्माच्छ्रुत्याद्यनुरोधेनैव पदार्था अभ्युपेयाः।

तथाहि—आत्मा देहाऽतिरिक्तः "न जायते म्रियते वा विपश्चिन्नाऽयं कुतश्चिन्न बभूव कश्चित्। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे" इति श्रुतेः। "विलक्षणः स्थूलसूक्ष्मात् देहादात्मेक्षिता स्वदृक्। यथाऽग्निर्दारुणो दाह्यात् दाहको ऽन्यः प्रकाशकः" इति स्मृतेश्च। देहाऽतिरिक्ताऽऽत्माऽनभ्युपगमे महापुरुषेषूपलभ्यमाना जातिस्मृतिरनुपपन्ना, अननुभूते स्मृत्ययोगात्। एवं परशरीरं प्रविश्य ब्रह्मराक्षसादीनां गयापिण्डदानादिप्रार्थनाऽप्यनुपपन्ना, एवं नामभ्रमेण यमभटैर्नीतानां पुनरावृत्तिः, तत्रत्यवार्ताकथनादिकमप्यनुपपन्नम्। तथेदं सर्वं समः,

प्रमात्वे बाधकाऽभावात् । धियां प्रामाण्यस्यौत्सर्गिकत्वात्, गयापिण्डदानाऽनन्तरं ब्रह्मराक्षसकृतपीडाया निवृत्तिदर्शनाच्च । देहस्यैवात्मत्वे कृतहानाऽकृताऽभ्यागमश्च । तस्मात्—

श्रीवासुदेवभक्तानां दृश्यते प्राग्भवस्मृतिः ।
साऽन्यथा नैव घटते तस्मादात्मा तनोः पृथक् ॥११॥

स च स्वप्रकाशज्ञानस्वरूपः "अत्राऽयं पुरुषः स्वयंज्योतिः" इति श्रुतेः; "आत्मा ऽव्ययो ऽगुणः शुद्धः स्वयंज्योतिरपावृतः । अग्निवद् दारुवद् देहः कस्येहा कस्य संसृतिः" इति स्मृतेश्च । आत्मनः स्वप्रकाशज्ञानस्वरूपत्वाऽनभ्युपगमे घटोऽयं घटोऽयमिति धारावाहिकज्ञानाऽनन्तरमाप्रहरं घटमेवाऽहमनुभवन्नासमिति सार्वजनीनं स्मरणं न सङ्गच्छेत, अननुभूते स्मृत्ययोगात् । मध्ये चाऽनुव्यवसायाऽभ्युपगमे धाराविच्छेदाऽऽपत्तेः नाऽन्यदवेदिषमिति स्मृतिबाधश्च ।

यत्तु नेदं स्मरणं, किन्तु तद्गोचराऽनुमितिरिति, तन्न । लिङ्गाऽभावेनाऽनुमित्ययोगात् । तथाहि—न तावदर्थव्यवहारो लिङ्गं, व्यवहाराऽज्ञानेऽपि पूर्वोक्ताऽनुसन्धानदर्शनात् । व्यवहारेण ज्ञानमात्रसिद्धावपि तस्मिन् प्रहरसम्बन्धस्य चाक्षुषत्वाऽऽदिविशेषस्य च सिद्ध्ययोगाच्च । न च प्रहरत्वं पक्षतावच्छेदकं कृत्वा एतत्प्रहराऽवच्छिन्नोऽहं घटज्ञानवान् घटव्यवहर्तृत्वादिति साध्यमाने पक्षताऽवच्छेदकाऽवच्छेदेन साध्यसिद्धेः प्रहराऽवच्छिन्नज्ञानसिद्धिरिति वाच्यम्, तावताऽपि चाक्षुषत्वाऽऽदिविशेषस्य ज्ञाने ऽसिद्धेस्तेन विना ऽद्राक्षमस्प्राक्षमित्याद्यनुसन्धानाऽयोगात् । यथाक-

थंचित् ज्ञानाऽनुमानेऽपि तदाऽन्यज्ञानाऽवेदिषमितीतरविषयकज्ञानाभावप्रतीत्यनुपपत्तिः सुदृढैव । न च घटज्ञानेनैव तदानीन्तनेतरज्ञानाऽभावाऽनुमा, युगपदनेकविषयकज्ञानसम्भवेनैकज्ञानस्येतरज्ञानाऽभावेन समं व्याप्त्यभावेनाऽनुमित्ययोगात् । तस्मात् स्वप्रकाशाऽऽत्मस्वरूपज्ञानेनैव घटपटाद्याकारवृत्तयस्तदभावाश्च भासन्त इति तद्बलादेव धारानुसन्धानम् ।

एवं स्वाप्नपदार्थज्ञानमपि स्वप्रकाशसाक्ष्येव, तदन्यज्ञानस्य तत्राऽसम्भवात् । न च स्मृतिरूपं तत्, देशविशेषवैशिष्ट्यस्य पूर्वमननुभूतस्य स्मरणाऽसम्भवात् । नन्वदृष्टविशेषाद्विशकलितपदार्थोपस्थितौ सत्यामेव स्मृतिं प्रत्यासत्तीकृत्य मनसा तावद्विषयकं विशिष्टज्ञानमुत्पाद्यत इति किं साक्षिणेति चेन्न । ज्ञानस्य प्रत्यासत्तित्वे ऽनुमानादिप्रामाण्योच्छेदापत्तेः । तथाहि—वह्निना साकं ज्ञानलक्षणप्रत्यासत्तेः सत्त्वात् पर्वतेऽपि किमिति वह्निप्रत्यक्षमेव न भवेत् । समाने विषये प्रत्यक्षसामग्र्या अनुमितिसामग्रीतो बलवत्त्वात् । न चाऽलौकिकप्रत्यक्षसामग्र्यपेक्षया ऽनुमितिसामग्री प्रबलेति तस्या एवोत्पत्तिरिति वाच्यम्, तथा सति भ्रमरूपविशेषदर्शनाऽनन्तरं भ्रमरूपं पुरुषप्रत्यक्षं न स्यात् तस्याऽलौकिकत्वात् । न च भ्रमाऽनुमितिसामग्री बलवती, भ्रमरूपविशेषदर्शनस्थले च सा नास्तीति वाच्यम्, भ्रमाऽनुमित्युच्छेदप्रसङ्गात् । न च क्वचित् किञ्चित् प्रबलं, न तु तत्र नियामकविशेषोऽस्तीति वाच्यम्, तर्हि पर्वतेऽपि वह्निप्रत्यक्षमेवाऽस्तु, किमनुमित्या । नन्वेवं पर्वते वह्निमनुमिनो-

मीत्यनुव्यवसायो न स्यात्, तत्राऽनुमितित्वाऽभावादिति चेन्न। अनुमितित्वशाब्दत्वाऽऽदिकं प्रत्यक्षत्वव्याप्यं जात्यन्तरमित्यभ्युपगमेनाऽपि तादृशानुव्यवसायोपपत्तेः। तस्मात् ज्ञानलक्षणप्रत्यासत्त्यभ्युपगमे चार्वाकमतप्रवेशः स्फुट एवेति, न ज्ञानं प्रत्यासत्तिः। नन्वेवं कथं सुरभिचन्दनमिति चाक्षुषज्ञानं, सौरभांऽशे प्रत्यासत्त्यभावात्, त्वया ज्ञानस्य प्रत्यासत्तिताऽनभ्युपगमादिति चेन्न। तत्र चन्दनत्वेन सौरभस्याऽनुमानात् क्वचित् स्मरणाच्च प्रत्यभिज्ञाऽपि, तत्रांऽशे स्मृतिरेवेति न तदनुरोधेनाऽपि ज्ञानं प्रत्यासत्तिः। नन्वेवं कथं कविकाव्यमूलभूतं ज्ञानं, तस्य स्मृतित्वाऽभावात् तद्विषये प्रमाणान्तरस्य चाऽप्रसरादिति चेन्न। तस्य शाब्दबोधत्वात्। तथाहि—त्वन्मते पदार्थेष्विव दैववशात् पदेषु स्मृतेषु सत्सु तैरेव शाब्दबोधः, पदविशेषजन्यपदार्थोपस्थितेरेव शाब्दबोधसामग्रीत्वात्। तात्पर्यादिज्ञानस्य च शाब्दबोधाऽकारणत्वात्। एतच्चाग्रे निरूपयिष्यते। तस्मात् स्वाप्नपदार्थसाधकः साक्ष्येवेति सिद्धम्।

ते च स्वाप्नपदार्था अन्तःकरणोपहितसाक्षिण्युत्पद्यन्ते। तथा च श्रुतिः "न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते" इति। अनुपहिते चाऽध्यासे साक्षिसम्बन्धाऽभावाद्भानाऽनुपपत्तिः। ते च पदार्था मूलाऽज्ञानपरिणामाः, तदन्यस्योपादानत्वे प्रमाणाऽभावात्। ते चाऽविद्याऽतिरिक्तनिद्राऽऽदिदोषजन्यत्वात् प्रातिभासिकाः, जाग्रद्बोधेन तेषां प्रविलयमात्रम्, तदुपादानाऽज्ञानस्य तेन विना ऽनिवृत्तेः।

यत्तु स्वप्नसृष्टिः पारमार्थिकीति, तन्न, "स्वप्ने स जीवः

सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके" इत्याथर्वण-श्रुतिविरोधात् । तस्मात् स्वाप्नपदार्थभासकः स्वप्रकाशः साक्ष्येवेति सिद्धम् ।

एवं सुषुप्त्यादिसाक्ष्यपि स एव । तेन विना सुखमहमस्वाप्सं, नाऽन्यत्किञ्चिदवेदिषमिति परामर्शाऽनुपपत्तेः अननुभूते स्मृत्ययोगात् । नचेदं न स्मरणं, किन्त्वनुमितिरेवेति वाच्यम्, लिङ्गाऽभावेनाऽनुमित्ययोगात् । न च नयनप्रसादादिना तदनुमानं, स्वीयसुषुप्त्यादिज्ञानं विना तल्लिङ्कवितव्याप्तिग्रहस्यैवाऽभावेनाऽनुमित्ययोगात् । परकीयसुषुप्तेश्च परं प्रत्यप्रत्यक्षत्वेन व्याप्तिग्रहाऽयोगात् । नच तदीयवचनात् तत्सुषुप्तिं ज्ञात्वा तत्र व्याप्तिग्रहः, तेनाऽपि स्वीयसुषुप्ते ज्ञातुमशक्यत्वात् । तेनाऽपि पुरुषाऽन्तराऽनुसरणेऽप्ययमेव दोषो, ऽन्धपरम्परा च । नचाऽहं पूर्वकाले सकलजन्यज्ञानोपरमवान् तद्वत्तया ऽनुसन्धानादिति सुप्तोत्थितस्य तदनुमानमिति वाच्यम्, वेद्यज्ञानवादे ज्ञानस्याऽनुसन्धाननियमाऽभावेन व्यभिचारात् । तस्मात् साक्ष्येवाऽत्र शरणम् । तदुक्तं भगवता व्यासेन, "बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः । तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः" इति । एवं प्रतिपुरुषं सुखदुःखाऽऽदिविषयाऽनन्तज्ञानकल्पने गौरवादेक एव साक्षी सर्वावभासकः स्वप्रकाश इति । तस्मात्—

जाग्रत्स्वप्नसुषुप्त्यादिसाक्षी चैतन्यविग्रहः ।
देहातिऽरिक्त आत्मेति श्रुतिस्मृतिविदां मतम् ॥१२॥

ननु स्वप्रकाशः साक्षीत्युक्तम्, तत्र किंतावत् स्वप्रकाशत्वं, न तावत् ज्ञानाऽविषयत्वम्, साक्षिणोऽपि वेदान्तज-

न्यज्ञानविषयत्वेनाऽननुभवात् । नाऽपि चैतन्याऽविषयत्वम्, साक्षिणोऽपि चैतन्यविषयत्वात् । अन्यथा तद्व्यवहारो न स्यात् । व्यवहारस्य व्यवहर्तव्यविषयकचैतन्यसाध्यत्वादिति चेत्, उच्यते—चिदविषयत्वं स्वप्रकाशत्वं, तच्च वृत्तिविषयत्वेऽप्यविरुद्धम्, न च चैतन्यविषयत्वाऽभावे तद्व्यवहाराऽनुपपत्तिः, व्यवहारत्वेन चैतन्यत्वेन च कार्यकारणभावो लाघवात्, न तु तद्विषयचैतन्यत्वेन, गौरवात् । न चैवं घटविषयकचैतन्यात् पटव्यवहाराऽऽपत्तिः, घटादिव्यवहारत्वेन तत्तद्विषयचैतन्यत्वेन च विशेषकार्यकारणभावस्याऽपि सत्त्वेन तदभावादेव तद्व्यवहारात् । नचाऽऽत्मन्यपि विशेषकार्यकारणभावोऽस्त्विति वाच्यम्, स्वप्रकाशस्वरूपेणैव तद्व्यवहारोपपत्तावात्मव्यवहारत्वेन तद्विषयकचैतन्यत्वेन विशेषकार्यकारणभावस्याऽकल्पनात् । तस्मात् चिदविषयत्वमेव स्वप्रकाशत्वम् । नन्वननुभवादलक्षणम्, 'सुखमहं जानामि' इति सुखभासकसाक्षिणोऽपि चैतन्यविषयकत्वानुभवादिति चेन्न । स्वप्रकाशसाक्ष्यनुभवस्यैवैवमाकारत्वात् । अस्तु वै तदनुभवबलात् साऽक्षिणोऽपि कल्पितभेदेन चिद्विषयत्वम् । न चैवं स्वप्रकाशत्वाऽनिरुक्तिः, यावत्स्वरूपमनुवर्तमानविषयत्वाऽभाववत्त्वस्यैव स्वप्रकाशत्वात् । तस्मान्न स्वप्रकाशत्वाऽनिरुक्तिः ।

स चात्मा सुखस्वरूपः । तदुक्तं सप्तमस्कन्धे ऽवधूतप्रह्लादसंवादे—"सुखमस्यात्मनो रूपं सर्वेहोपरतिस्तनुः । मनःसंस्पर्शजान् दृष्ट्वा भोगान् स्वप्स्यामि संविशन्" इति । अस्याऽर्थः—सुखमस्य जीवस्य स्वरूपमेव, तर्हि स-

वैषां किं न प्रथते तत्राऽऽह—सर्वेति। तनोतीति तनुः, अभिव्यञ्जिका, तथा च तदभावान्न प्रथत इत्यर्थः। एवं परमप्रेमास्पदत्वादप्यात्मा सुखरूपः, न च सुखसमवायितया तस्य परमप्रेमास्पदत्वम्, न तु सुखरूपत्वादिति वाच्यम्, तथा सति दुःखसमवायितया तस्मिन् निरुपाधिद्वेषप्रसङ्गात्। एवं स्वरूपस्य सुखत्वाऽनभ्युपगमे मोक्षस्य पुरुषार्थताऽपि न स्यात्, तत्र चान्यसुखासम्भवात्। न च नास्त्येव तत्र सुखं, दुःखाऽभावोद्देशेनैव मुमुक्षूणां तत्र प्रवृत्तेरिति वाच्यम्, दुःखाऽभावस्य स्वतःपुरुषार्थत्वाऽभावात् सुखशेषतयैव तस्याऽपेक्षणात्। तदुक्तमभियुक्तैः—"गोतमाभिमतां मुक्तिं गोतमः गन्तुमर्हति। न हि मूर्छाद्यवस्थासु प्रवृत्तो दृश्यते सुधीः" इति।

एवमात्मनः सुखरूपत्वाऽभावे सुखमहमस्वाप्समिति परामर्शाऽनुपपत्तिश्च। दुःखाऽभावविषयता तस्येतिचेत्, अहो महदिदं व्याख्याकौशलं यदनुभवोऽपि व्याख्यायते। किञ्च दुःखाभावोऽपि सुषुप्तावननुभूतस्त्वन्मते स कथं परामृष्टव्यः, नचाऽहं सुषुप्तिकाले दुःखाभाववान्, दुःखसामग्रीविरहादिति तदनुमानमिति वाच्यम्, तदानीन्तनसामग्र्यभावस्याऽपि ज्ञातत्वाऽभावेनाऽनुमानाऽयोगात्। तस्मादात्मैव सुखरूपः।

तस्य चाऽऽत्मनः संसारो ऽहङ्कारोपाधिकः "अहङ्कारकृतं बन्धमात्मनोऽर्थविपर्ययम्। विद्वान् विभिद्य संसारचिन्तां तुर्ये स्थितस्त्यजेत्" इति स्मृतेः। ननु वास्तवः "असत्त्वादात्मनोऽन्येषां भावानां तत्कृता भिदा। गतयो हेतवश्चाऽस्य मृषा स्वप्नदृशोय यथा"। असत्त्वात्। यद-

न्यत्वात् । "यावद् देहेन्द्रियप्राणैरात्मनः सन्निकर्षणम् । संसारफलवांस्तावदपार्थोऽप्यविवेकिनः" इत्यादि स्मृतेः ।

नन्वात्माऽतिरिक्तः कोऽयमहङ्कारो नाम ? उच्यते-देहाऽऽद्व्यतिरिक्तश्चिदात्मैवाऽन्तःकरणविशिष्टः सन् अहङ्कार इत्युच्यते । विशिष्टश्च स्वरूपादौपाधिकभेदेन भिन्नः, स एव प्रमाश्रयत्वात् प्रमातेति, कर्तेत्यप्युच्यते । अन्तःकरणविशिष्टस्यैव कर्तृत्वात् । ननु "कर्तुर्मम मनः" इति प्रतीतेरन्तःकरणसाक्षिणः केवलस्यैव कर्तृत्वं, न तु कर्तृकोटावन्तःकरणस्य प्रवेशः, तस्य सुखाद्युपलब्धिकरणतयैवाऽनुमानादिति चेन्न । सुखदुःखाद्युपादानस्यान्तःकरणस्वभावत्वात् । अन्यथा दुःखादेः साक्षिणाऽपि भानोपपत्तौ तदसिद्ध्यापत्तेः । कर्तुर्मम मन इति प्रतीतिश्च कर्तुर्ममाऽऽत्मेतिवदुपपद्यते । तस्मात् दुःखादिधर्मि यदन्तःकरणं, तत्तादात्म्याऽऽपन्न एवाऽऽत्माऽहमिति प्रतीतेर्विषय इत्यात्मन औपाधिक एव प्रमातृत्वादिसंसारः । ननु दुःखादिकमात्मन एव धर्मः, अन्यथा बन्धमोक्षयोर्वैयधिकरण्याऽऽपत्तिरिति चेन्न । "कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" इति श्रुत्या, "शोकहर्षभयक्रोधलोभमोहस्पृहाऽऽदयः । अहङ्कारस्य दृश्यन्ते जन्ममृत्युश्च नाऽऽत्मनः" ॥ इति स्मृत्या च दुःखाऽऽदेरन्तःकरणधर्मत्वस्यैवावगमनात्, दुःखादिधर्मकस्य चाऽन्तःकरणस्याऽऽत्मन्यध्यस्तत्वात् तत्राऽपि धर्मिविषमसत्ताकं दुःखमस्त्येवेति न बन्धमोक्षयोर्वैयधिकरण्यम् । तस्मात् सत्यज्ञानानन्दरूपस्याप्यात्मनोऽहङ्कारोपाधिको बन्ध इति सिद्धम् ।

नन्वात्मनश्चित्स्वरूपत्वे सर्वं सर्वदा सर्वस्याऽपरोक्षतया भायात्, चैतन्यसम्बन्धरूपत्वे सुखदुःखादिनेव घटाऽऽदिनापि चक्षुरादेरनपेक्षणादिति चेत्। उच्यते—साक्षिसम्बन्धोऽपरोक्षता न चैतन्यमात्रसम्बन्धः, साक्षी चाऽन्तःकरणोपहितः। तदुक्तं स्कान्दे सूतगीतायाम्—"एकत्वेऽपि पृथक्त्वेन व्यपदेशोऽपि युज्यते। अन्तःकरणभेदेन साक्षिणः प्रत्यगात्मनः" इति।

तथा "चित्तत्रयसम्बन्धद्वारेणैव दृगन्वयात्। विभान्ति न स्वतो बाह्यविषयाश्च तथैव च" इति। तत्सम्बन्धश्च घटादेर्न चक्षुरादिकं विना घटते। तथाहि—अन्तःकरणं मध्यमपरिमाणं, तच्च चक्षुरादिसहकारेण बहिर्निःसृतं सत् बाह्यपदार्थैः सम्बध्यते। तदुक्तं श्रीवासुदेवेन—"इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते। तदस्य हरति प्रज्ञां वायुर्नावमिवाऽम्भसि" इति। तथा स्कान्देऽपि—"सर्वेषां तु मनस्तेन प्रेरितं नियमेन तु। विषये गच्छति प्राणश्चेष्टते वाग् वदत्यपि" इति। सैषा अन्तःकरणस्य विषयाऽवस्थाविशेषो वृत्तिरित्युच्यते। तथा च वृत्त्याऽन्तःकरणाऽवच्छिन्नघटाऽवच्छिन्नचैतन्ययोः पूर्वं स्थिते ऽन्तःकरणत्वाऽवच्छिन्नत्वाऽनवच्छिन्नत्वकृते भेदे नष्टे सति साक्षिसम्बन्धादपरोक्षतया घटादि भासते। नन्वेवं घटे पाषाणोऽयमिति भ्रमकालेऽपि घटोऽपरोक्षतया भायात्, साक्षिसम्बन्धस्येदमाकारवृत्त्या निष्पन्नत्वादिति चेन्न। अनावृतसाक्षिसम्बन्धस्याऽपरोक्षत्वात्, तत्र च घटाऽवच्छिन्नचैतन्ये आवरणस्य सत्त्वात्। ननु तर्हि तस्य कदाऽप्यपरोक्षता न स्यात्, आवरणनिवर्तकाभावादिति चेन्न। भ्रमजनकदोषनिवृत्तौ सत्यां

पश्चादुत्पन्नया घटाऽऽकारवृत्त्या घटाऽवच्छिन्नचैतन्यविषयिण्या घटाऽवच्छिन्नचैतन्यनिष्ठाऽऽवरणस्य निवर्तनात्, समानाश्रयविषयज्ञानस्याऽज्ञाननिवर्तकत्वात्।

परोक्षस्थले तु न वृत्तेर्निर्गमनं, निर्गमसहकारिणश्चक्षुरादेरभावात्। अत एवाऽपरोक्षविषयः फलव्याप्यः, परोक्षस्तु वृत्तिव्याप्य इति सिद्धान्तः। ननु तर्हि परोक्षपदार्थस्य साक्षिसम्बन्धाऽभावे कथं भानमिति चेन्न। चैतन्यसम्बन्धमात्रेण परोक्षतया भानोपपत्तेः। न चैवं सर्वदा सर्वप्रतीतिप्रसङ्गः, अज्ञानविशेषणतया भानस्येष्टत्वात्। ज्ञाततया ज्ञानार्थं तदाकारवृत्तेरप्यनपेक्षणात्। वृत्तेस्तदाकारत्वञ्च, परमते ज्ञानेच्छादेरिव तद्विषयकत्वमेव। विषयत्वं चाऽखण्डः कश्चिद्धर्मः प्रतियोगित्वाऽनुयोगित्वाऽभावत्वादिवत्। तस्माच्च परोक्षतया भानार्थं वृत्तिनिर्गमनम्।

एवमुत्पत्तिदशायामेव ये साक्षिसम्बद्धा, ये वा निरन्तरसाक्षिसम्बद्धास्तेषु तदाकारवृत्तिरपि नाऽपेक्ष्यते ऽनुपयोगात्। तेन सङ्गृहीता नृसिंहाऽऽश्रमगुरुचरणैः—"अज्ञानमन्तःकरणं च तस्य कामादयो यस्तदभाव एषः। स्वप्नेऽपि यद्यत्तदशेषमेव विना प्रमाणं निजबोधसिद्धम्" इति। अस्यार्थः-अज्ञानादिकं तस्याऽन्तःकरणस्य कामादयो वृत्तिविशेषाः, तेषां कामादीनामभावः। स्वप्ने यद्वस्तूत्पद्यते तत्सर्वम्। उपलक्षणञ्चैतत्, स्वाप्नपदार्थानामभावः प्रातिभासिकं रजतादिकञ्च एतत्सर्वं स्वाऽऽकारवृत्तिमन्तरेणाऽपि स्वरूपबोधेनैव सिद्धमिति। एतेन ज्ञानादेरनुव्यवसायगम्यत्वं निरस्तम्। ज्ञानलक्षणप्रत्यासत्तेर्दूषितत्वेनाऽनुव्यवसाये घटादिभानस्याऽसम्भवेन केवलज्ञानमात्रविषयकाऽनुव्यवसा-

यस्याऽनुपलम्भबाधितत्वात् एकेनैव साक्षिणा ज्ञानाऽऽदि-भानोपपत्तावनन्तज्ञानकल्पने प्रमाणाऽभावाच्च। तस्मा-दन्तःकरणादयः केवलसाक्षिभास्या एवेति सिद्धम्।

स चाऽन्तःकरणसाक्षी जीवात्मा परमेश्वरस्य प्रतिबिम्बः। "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनु गच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजो-ऽयमात्मा" इति श्रुतेः। "एक एव परो ह्यात्मा भूतेष्वात्मन्य-वस्थितः। यथेन्दुरुदपात्रेषु भूतान्येकात्मकानि च" इति स्मृतेश्च।

ननु जीवस्य प्रतिबिम्बत्वे ब्रह्मणो भेदप्रसङ्गः, लोके 'इमौ चैत्रतत्प्रतिबिम्बौ" इति बिम्बप्रतिबिम्बयो र्भेदस्य निर्णयादि-ति चेन्न। भेदमात्राऽऽपादने तस्येष्टत्वात्, पारमार्थिकभेदापा-दने च दृष्टान्ताऽसिद्धेः। तत्र ग्रीवास्थ एव मुखे उपाधिसन्नि-धानाद्भेदारोपेण पारमार्थिकभेदस्वाऽभावात्। न चैवं दर्पणे मुखमिति प्रतीत्यनुपपत्तिः, ग्रीवास्थ एव मुखे दर्पणस्थत्व-स्याऽऽरोपेण तदुपपत्तेः। न च मुखेन्द्रियसन्निकर्षाभावे भेदाद्यारोपाऽनुपपत्तिः, दर्पणाऽभिघातेन परावृत्तचक्षुषा मुखग्रहणसम्भवात्। तदुक्तम्—"दर्पणाऽभिहता दृष्टिः प-रावृत्य स्वमाननम्। व्याप्नुवत्याभिमुख्येन व्यत्यस्तं दर्शये-न्मुखम्" इति।

नन्वेवं जलादेर्दृष्ट्यभिघातकत्वे जलान्तःपातिपाषा-णादिग्रहो न स्यात्, अनभिघातकत्वे च तत्र प्रतिबिम्बो न स्यादित्युभयतः पाशा रज्जुरिति चेन्न। तत्र केषांचित् च-क्षुरवयवानामभिघातेऽपि केषांचित् जलमध्येऽपि प्रविष्टत्वेन तदुभयोपपत्तेः फलबलेन विरलाऽवयवे तथैवाऽभ्युपगमात्।

नन्वेवमपि शुक्तिरजतादिप्रतिबिम्बे का गतिः, तत्राऽज्ञानाऽभावेन भेदाऽऽरोपाऽयोगात्, समानसत्ताकयो र्भेदाऽभेदयोर्विरोधाच्चेति चेन्न । तत्र भेदस्य मूलाऽज्ञानकार्यत्वेनाऽवस्थाज्ञानाभावेऽप्यनुपपत्त्यभावात् । वस्तुतस्तु तत्राऽप्यज्ञानं तिष्ठत्येव, अन्यथा इदं द्रव्यं न वा देवदत्तीयं न वेत्यादि संशयाऽनुपपत्ते र्घटादावपि संशयस्यैवाऽज्ञानकल्पकत्वात् । न चैवं प्रातिभासिके ऽज्ञानं नास्तीति सिद्धान्तविरोधः, रजतत्वादिप्रकारकसंशयजनकमज्ञानं नास्तीति तदर्थात् । तस्मान्न क्वाप्यनुपपत्तिः । न च समानसत्ताकयो र्भेदाऽभेदयोर्विरोधः, अनौपाधिकयोरेव तयोर्विरोधात् । अन्यथा ऽऽकाशे घटमठादिप्रयुक्तभेदो व्यावहारिक इति सिद्धान्तेऽप्यगतेः । तस्मात् सोपाधिकः सर्वोऽपि भेदो मूलाऽज्ञानस्य तूलाऽज्ञानस्यैव वा कार्यमिति न प्रातिभासिकरजतादेः प्रतिबिम्बाऽनुपपत्तिः ।

नन्वेवमपि नात्मनः प्रतिबिम्बः, नीरूपस्य प्रतिबिम्बाऽसम्भवात् । अन्यथा वायोरपि प्रतिबिम्बाऽऽपत्तिरिति चेन्न । नीरूपस्याऽपि रूपादे र्लोके प्रतिबिम्बदर्शनात् । न च नीरूपद्रव्यस्य तदसम्भवः, आकाशे व्यभिचारात् । न चाऽऽकाशस्य न प्रतिबिम्बः, किन्त्वभ्रादेरेवेति वाच्यम्, दर्पणाऽभिहतेत्यादिन्यायेन चाक्षुषमात्रस्य प्रतिबिम्बसम्भवेनाकाशस्याऽपि प्रतिबिम्बसम्भवात् । अन्यथा प्रसृतिपरिमिते जले दूरदेशस्थतया ऽनेकचन्द्राभ्राऽऽदिप्रतीतिर्न स्यात् । न च नीरूपस्याऽऽकाशस्य चाक्षुषत्वाऽनुपपत्तिः, रूपादिवत्तदुपपत्तेः । न च द्रव्येऽयं नियमः, आत्मनि व्यभिचारात्, तस्याऽपि चक्षुर्जन्यवृत्तिविषयत्वात्, रूपादे-

रपि दृश्यत्वाच्च । तस्याऽपि तद्रूपाश्रयत्वस्य प्रागुपपादितत्वात् । न चैवं "अप्रत्यक्षेऽपि ह्याकाशे" इति भाष्यविरोधः, तस्याऽभ्युपगमवादपरतया मतान्तरपरतया वा ग्रन्थकारैर्व्याख्यातत्वात् । न चैवं वायोरपि प्रतिबिम्बताऽऽपत्तिः, बिम्बमहेतूनां विचित्रतयैतादृशशङ्काया अनधिकरणत्वात् । अन्यथा त्वन्मते गुरुत्वादेरपि प्रतिबिम्बः किं न स्यात्, तस्याऽचाक्षुषत्वान्नेति चेत्, समं वायावपि । यत्तु जीवस्य प्रतिबिम्बत्वेऽचेतनत्वप्रसङ्गः, लोके प्रतिबिम्बानामचेतनत्वस्यैवाऽवधारणादिति, तत्तुच्छम् । जडप्रतिबिम्बस्य जडत्वेऽपि चेतनप्रतिबिम्बस्य चेतनत्वे बाधकाऽभावात् । यदपि दर्पणाऽभिहता दृष्टिरित्यादिप्रक्रिया जीवप्रतिबिम्बे न सम्भवतीति, तत्तथैव । यत्र बिम्बप्रतिबिम्बभावेन भेद उत्पद्यते तत्रेयं प्रक्रिया, यत्र त्वनादिसिद्धो बिम्बप्रतिबिम्बभावेन भेदः, तत्राऽस्या अनुपयोगात्, यथा ऽस्मदादिज्ञानस्य शरीरसापेक्षत्वेऽपि नेश्वरज्ञानस्य तदपेक्षा तद्वत् । तस्मात्-

**सत्यज्ञानानन्दमूर्तिरहङ्कारेण संसरन् ।**
**जीवः श्रीवासुदेवस्य प्रतिबिम्ब इति स्थितम् ।१३।**

तत्र सत्त्वरजस्तमोगुणाऽऽत्मकमज्ञानं प्रतिबिम्बोपाधिः । ननु किमज्ञानेन, न जानामीतिप्रतीतेर्ज्ञानाभावविषयत्वेन तत्पदार्थाऽवच्छिन्नचैतन्याऽज्ञातत्वविषयत्वेन च यथायोगमुपपत्तेः । सिद्धान्ते शुक्तिरजतादे र्भावरूपाऽज्ञानविषयत्वेनाऽगत्या त्वया ज्ञायमानं रजतं न जानामीत्यत्र तथैव वक्तव्यत्वात् । न च जीवोपाधित्वेनैव तत्स्वीकारः, अन्तःकरणेनाऽपि तन्निर्वाहात्, तस्याऽपि तैजसत्वेन स्वच्छतया प्रतिबिम्बोद्ग्रहणसामर्थ्यादिति चेन्न । 'अजामेकाम्' इत्यादिश्रुत्या 'दैवी ह्येषा गुणमयी मम माया दुरत्यया । मा-

मेव ये प्रपद्यन्ते मायामेतां तरन्ति ते'। इति स्मृत्या च सिद्धस्याऽज्ञानस्य कुयुक्तिमात्रेणाऽपहस्तयितुमशक्यत्वात्। नन्वेते श्रुतिस्मृती प्रकृतिं मायां च ब्रूतो नत्वज्ञानमिति चेन्न। प्रकृतेरेव ज्ञाननिवर्त्यतयाऽज्ञानमविद्येत्यादिशब्दैरुपचाराद् व्यवहारात्। तदुक्तं स्कान्दे-"अन्यथाभानहेतुत्वादियं मायेति कीर्तिता। आत्मतत्त्वतिरस्कारात्तम इत्युच्यते बुधैः। विद्यानाश्यत्वतोऽविद्या मोहस्तत्कारणत्वतः। सद्विलक्षण्यदृष्ट्येयमसदित्युदिता बुधैः। कार्यवद् व्यक्तताऽभावादव्यक्तमिति गीयते। एषा माहेश्वरी शक्तिर्न स्वतन्त्रा परात्मवत्" इति। सैव विक्षेपशक्तिप्राधान्येन मायेति, आवरणशक्तिप्राधान्येनाऽविद्येत्यप्युच्यते। एतदेवाऽभिप्रेत्योक्तं मोक्षधर्मेषु--"अहर्मुखे विबुद्धः सन् सृजतेऽविद्यया जगत्। अग्र एव महद् भूतमाशु व्यक्तात्मकं मनः। तदिदं नाऽप्रशान्ताय नादान्तायाऽतपस्विने। नाऽवेदविदुषे वाच्यं तथा नाऽनुगतायच। न तर्कशास्त्रदग्धाय तथैव पिशुनायच" इति। एवं युक्तिबलादपि भावरूपाऽज्ञानमेषितव्यम्।

तथा हि—जगदुपादानत्वेनाऽनेकेषां परमाणूनामभ्युपगमे गौरवं, एकस्यैवाज्ञानस्य द्व्यणुकोपादानताऽभ्युपगमे लाघवम्। न चैकस्याऽऽरम्भकत्वे निरन्तरं कार्योत्पत्तिप्रसङ्गः, बहूनामारम्भकत्वेऽपि प्रलयकाले द्व्यणुकोत्पत्तेर्दुर्वारत्वात्, तत्र चाऽगत्या कालविशेषादेर्नियामकत्वे प्रकृतेऽपि तथैव भविष्यतीति किमनन्तपरमाणुभिः। न चैकस्यारम्भकता लोके न दृष्टेति वाच्यम्, एकस्यैव घटस्य रूपाद्यारम्भकत्वदर्शनात्। न चैकस्य द्रव्यारम्भकत्वाऽनुपपत्तिः, एकेनैव

दीर्घतन्तुना ऽसंवलितेन सता पटादेरुत्पादनसम्भवात्, स्थलविशेषे तथादर्शनाच्च । द्रव्यगुणादिपरिभाषायां वैयाकरणानां टिघुभाऽऽदिपरिभाषावन्नियुक्तिकतया पदार्थाऽव्यवस्थापकत्वेनाऽप्रयोजकत्वाच्च । किञ्च परमाणूनां परस्परसंयोगाऽसम्भवादपि न परमाणव उपादानम् । तथा हि—संयोगः किं व्याप्य वर्तते ऽव्याप्य वा? नाद्यः, आकाशे कर्णशष्कुलीसंयोगस्य व्याप्यवृत्तौ देशाऽन्तरीयशब्दग्रहप्रसङ्गात्, तत्रत्यनभसोऽपि कर्णशष्कुल्यवच्छिन्नत्वेन श्रोत्रतया तत्रत्यशब्दस्यापि श्रोत्रसमवेतत्वात् । वृक्षे कपिसंयोगस्य व्याप्यवृत्तितया अननुभवपराहतत्वाच्च । न द्वितीयः, निरवयवतया ऽवच्छेदकद्वयरहिते तस्मिन्नव्याप्यवृत्तिसंयोगाऽसम्भवात् । अथ तत्र दिगादिरवच्छेदकः, असम्बद्धस्याऽवच्छेदकत्वाऽयोगात् । सम्बद्धस्याऽवच्छेदकत्वे सोऽपि सम्बन्धः किं व्याप्य वर्तते ऽव्याप्य वा? आद्ये ऽवच्छेदकस्य व्याप्यवृत्तितया तदवच्छेदेन विद्यमानसंयोगस्याऽपि व्याप्यवृत्तितापत्तिः । अन्त्ये, तत्राऽप्यवच्छेदकाकाङ्क्षायामनवस्था । सा च ज्ञप्तिप्रतिबन्धिका । भावाऽभावयोरवच्छेदभेदज्ञानमन्तरेणैकस्मिन् ज्ञानाऽसम्भवात् । ग्राह्याऽभावनिश्चयस्य प्रतिबन्धकत्वात् । एवमनन्ताप्रामाणिकाऽणुककल्पनागौरवं च । तस्माद् वरमेकमेवाऽज्ञानमुपादानम् । ननु तावताऽपि क्लृप्तान्यणुकान्येवोपादानं भवन्तु किमक्लृप्ताऽज्ञानकल्पनेनेति चेन्न । तत्राऽपि निरवयवानामणुकानां संयोगाऽनुपपत्तेस्तुल्यत्वात् । किञ्चैवं प्रलयकालेऽपि सृष्टिः किं न स्यात् अणुकाऽऽदीनां सत्त्वात् । न चाऽदृष्टोद्बोधाऽभावात् कार्याऽभावः, तस्याऽपि तदानीमापाद्यमानत्वात् । न च कालविशेषाऽभावात् तदभावः,

दत्तोत्तरत्वात् । तस्मादघटितघटनापटीयसी मायैवाऽत्र शरणमिति सैवोपादानम् । तदुक्तं स्कान्दे—"माया च प्रलये काले परस्मिन् परमेश्वरे । सत्यबोधसुखाऽनन्तब्रह्मरूपादिसंज्ञिते । अभेदेन स्थितिं याति हेतुस्तत्र सुदुर्गमः" इति । तथा च श्रुतियुक्तिभ्यां सिद्धं भावरूपाऽज्ञानमेव प्रतिबिम्बोपाधिरिति सिद्धम् ।

एतदेवाऽज्ञानं जीवं प्रति ब्रह्माऽभेदस्याऽऽनन्दादेश्चाऽऽवरकम् । तदुक्तं स्कान्दे—"तमहंप्रत्ययव्याजात् सर्वे जानन्ति जन्तवः । तथाऽपि शिवरूपेण न विजानन्ति मायया" इति । स्मृत्यन्तरेऽपि 'अज्ञानेनाऽऽवृतं ज्ञानं तेन मुह्यन्ति जन्तवः' इति ।

आवरणं च अस्ति प्रकाशत इति व्यवहारयोग्ये नास्ति न प्रकाशते इति व्यवहारयोग्यत्वम् । तथाहि—जीवब्रह्मणोरभेदाज्जीवस्य पूर्णानन्दस्वरूपत्वाच्चाऽहं पूर्णानन्दोऽहं ब्रह्मेति व्यवहारयोग्यतायां सत्यामपि नाऽहं ब्रह्म नाऽहं पूर्णानन्द इति व्यवहारः सर्वजनीन उपलभ्यते । स च व्यवहार आविद्यकीं नास्तीतिव्यवहारयोग्यतामन्तरेणानुपपन्नः, सैव योग्यता ऽऽवरणमित्युच्यते ।

ननु योग्यताद्वयं परस्परविरुद्धं कथमेकस्मिन् स्थास्यतीति चेन्न । अस्ति प्रकाशत इति व्यवहारयोग्यतायाः स्वरूपात्मिकायाः पारमार्थिकतया मिथ्याभूतया नास्तीति व्यवहारयोग्यतया समं विषमसत्ताकत्वेन विरोधाभावात् । नन्वेवमानन्दस्यावृतत्वे ज्ञानस्याप्यावृतत्वापत्तिः, उभयोरपि स्वरूपाऽऽत्मकत्वात् । न ह्येकमेवाऽऽवृतमनावृतं चेति सम्भवतीति चेन्न । ज्ञानानन्दयोः कल्पितभेद-

सत्त्वेनाऽऽवृतत्वाऽनावृतत्वयोरुपपत्तेः । वस्तुतस्तु नाऽत्र विरोधलेशोऽपि, यथैकस्मिन्नेव घटे रूपमस्ति स्नेहो नाऽस्ति, न चैतावताऽस्तिनास्तीति विरोधः । एवमेकस्मिन्नेव जीवस्वरूपे आनन्दो नास्ति न प्रकाशत इति व्यवहारयोग्यता वर्तते, ज्ञानं नास्ति न प्रकाशत इति व्यवहारयोग्यता नास्ति, न चैतावता विरोधः, योग्यताद्वयमध्ये एकसत्त्वे ऽपरया ऽप्यवश्यं स्थेयमित्यत्राऽऽपादकाऽभावात् । तस्मात् पूर्णानन्द एवावृतः चैतन्यमनावृतमिति सिद्धम् । नन्वज्ञानमावरकमित्युक्तम्, आवरणस्याऽऽच्छादितत्वाऽज्ञानजन्यत्वाऽयोगादिति चेन्न । अनादिसिद्धस्याऽप्यावरणस्याऽज्ञानप्रयुक्तत्वेन तथा व्यवहारात् । प्रयुक्तत्वं च तत्स्थित्यधीनस्थितिकत्वमिति नोक्तदोषः । नन्वनयोरनादित्वे प्रयोज्यप्रयोजकभावः कुतः तथात्वे वा वैपरीत्यमेव किं न स्यादिति चेन्न । "नीहारेण प्रावृत:" इत्यादिश्रुत्यनुरोधेन "अज्ञानेनाऽऽवृतं ज्ञानं तेन मुह्यन्ति जन्तवः" इत्यादिस्मृत्यनुरोधेन चाऽनादिसिद्धयोरपि प्रयोज्यप्रयोजकभावाऽभ्युपगमात् । इदमेव समाधानं जीवत्वेश्वरत्वादिस्थलेऽपि । "अथवा देवदेवस्य सर्वदुर्घटकारिणी । शक्तिरस्ति तया सर्वं घटते मायया ऽनघाः" इति स्कान्दोक्त्या, "मायामयं वेद न वेदवेद्यम्" इति भगवदुक्त्या च सर्वप्रपञ्चस्य मायाधीनत्वाऽवगमात् । तस्मादज्ञानाऽधीनमेवाऽऽवरणमिति ।

तस्याऽज्ञानस्यैकत्वात् तत्र प्रतिबिम्बोऽप्येक इत्येकजीववादिनः । नच जीवैक्ये स्वर्गनरकबन्धमोक्षाऽऽदिव्यवस्थानुपपत्तिः, प्रमातृभेदेन तदुपपत्तेः । यदन्तःकरणे साक्षात्कार उत्पद्यते तदन्तःकरणोपादानाऽज्ञानाऽपग

निवृत्तत्वात्तस्य प्रमातुर्मोक्षः, नान्याऽन्तःकरणावच्छिन्नस्य। तथा च शुकादिमुक्तिश्रवणं काशीमरणान्मोक्षश्रवणञ्च न विरुध्यते। न चाऽज्ञानस्यांशकल्पनागौरवं, जीवन्मुक्तिप्रतिपादकशास्त्राऽनुरोधेन तदभ्युपगमस्य नानाज्ञानवादिनोऽप्यावश्यकत्वात्। अन्यथा साक्षात्कारेणाऽऽवरणांऽशो निवृत्तः, विक्षेपांऽशस्तु प्रारब्धेन प्रतिबन्धान्न निवृत्त इति कल्पनस्याऽप्यवकाशाऽऽपत्तेः। न च जीवैक्ये शरीरान्तराऽवच्छेदेनोत्पन्नसुखदुःखाद्यनुसन्धानप्रसङ्गः, यदन्तःकरणाऽवच्छेदेन यदुत्पन्नं, तदन्तःकरणाऽवच्छिन्नस्यैव तत्प्रतिसन्धानमित्यभ्युपगमात्। अन्यथा जीवैक्यस्य नियामकत्वे सर्वस्य जन्माऽन्तरीयसुखदुःखाद्यनुसन्धानाऽऽपत्तिः। कस्यचित्तदपि दृश्यत इति चेन्न। एतस्याऽपि जीवन्मुक्तेषु दर्शनात्। तस्मादस्मदादीनामनुसन्धानाऽननुसन्धानयोरन्तःकरणभेद एव प्रयोजक इत्येकजीववादिनः।

वाचस्पतिमिश्रास्तु "इन्द्रो मायाभिः" इति श्रुत्यनुरोधेनाऽनेकान्यज्ञानानि,-तत्प्रतिबिम्बा जीवा अप्यनेके, तथा च न बन्धमोक्षव्यवस्थाऽनुपपत्तिरित्याहुः।

संक्षेपशारीरिककारास्तु–एकमेवाऽज्ञानं, 'अजामेकाम्' इति श्रुतेः, लाघवाच्च। न चेन्द्रो मायाभिरिति श्रुत्या तद्बहुत्वं, मायाशब्दस्य शक्तिपरत्वात्। शक्तिबहुत्वं चाऽभिहितं विष्णुपुराणे–"शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः। शतशो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः" इति। भागवतेऽपि–"तेषु काले व्यजायन्त रचितावयवा हरेः। शक्तिभिर्दुर्विभाव्याभिः कोमलाङ्कतनूरुहाः" इति। तस्मिन् सत्त्वगुणप्रधानाज्ञाने प्रतिबिम्बितं चैतन्यमीश्वरः, अन्तःकरणे

प्रतिबिम्बितं चैतन्यं जीवः । "कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः" इति शास्त्रात् । अन्तःकरणानामनेकत्वादनेके जीवाः । तथा च तत्तदन्तःकरणोपादानाऽज्ञानांशस्य तत्तज्ज्ञानान्निवृत्ते तत्तस्य तस्य मोक्षः । न चाऽन्तःकरणस्य जीवोपाधित्वे 'भेदस्तु तस्याऽज्ञानकृतो भवेत्' इति स्मृतिविरोधः, जीवब्रह्मभेदस्याऽनादितया ज्ञानकृत इत्यस्य यथाश्रुतस्य बाधितत्वात् । अज्ञानस्थित्यधीनस्थितिकत्वविवक्षायान्तु अन्तःकरणोपाधिकत्वेऽपि तस्याऽक्षतिः । न च कार्यस्याऽन्तःकरणस्याऽनादिजीवोपाधित्वाऽसम्भवः, तस्याऽपि सूक्ष्मरूपेणाऽनादित्वात् । तदुक्तं भगवता—'पुंस्त्वादिवत्तस्य सतोऽभिव्यक्तियोगात्" इति । तस्मादन्तःकरणमेव जीवोपाधिरित्याहुः ।

तस्मात् सत्यज्ञानाऽऽनन्दात्मको जीव ईश्वरस्य प्रतिबिम्बः, स एवाऽहङ्कारविशिष्टः त्वम्पदस्य वाच्योऽर्थः । अहङ्काराऽऽदिविनिर्मुक्तस्त्वम्पदस्य लक्ष्याऽर्थ इति सिद्धम् ।



इति प्रथमः परिच्छेदः ।

# अथ द्वितीयः परिच्छेदः ।

इदानीं तत्पदार्थो निरूप्यते । सत्यज्ञानाऽऽनन्दरूपो जगज्जन्मादिकर्ता परमेश्वरस्तत्पदार्थः । 'सत्यं ज्ञानमनन्तं ब्रह्म' 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतेः । स च वेदैकगम्यः 'तं त्वौपनिषदं पुरुषं पृच्छामि नायं वेदविन्मनुते बृहन्तम्' इति श्रुतेः, । 'श्रुत्येकगम्ये सूक्ष्माऽर्थे स तर्कः किं करिष्यति' इति स्मृतेः । युक्तेश्च । तथाहि—न तावत् क्षित्यादिकं उपादानगोचराऽपरोक्षज्ञानचिकीर्षाकृतिमज्जन्यं, कार्यत्वात् घटवदित्यनुमानेन तत्सिद्धिः अनुकूलतर्काऽभावेनाऽप्रयोजकत्वात् । न च कार्यकारणभावोऽनुकूलस्तर्कः कार्यमात्रेऽपादानादेरिव कर्तुरप्यनावश्यकत्वेन कार्यकारणभावस्यैवाऽसिद्धेः । अन्यथा पुच्छत्वेन शरीरत्वेन कार्यकारणभाव इति त्वय्यपि पुच्छं सिध्येत् । न चाऽनुपलब्धिबाधः, अङ्कुरादावतीन्द्रियकर्तुरिव त्वय्यप्यतीन्द्रियपुच्छस्यैवाऽनुमानेन विषयीकरणात् । किञ्च क्षित्यादिकं शरीरिकर्तृकमित्यनुमानाच्छरीरिणोऽपि सिद्ध्यापत्तिः । क्षितिकर्तरि ज्ञानादेर्नित्यत्वेन शरीरस्यापेक्षणेनाऽप्रयोजकत्वात् तादृशो न सिद्ध्यतीति चेत्तर्हि कृतेर्नित्यतया ज्ञानस्योपयोगाऽभावेन तद्वतोऽप्यसिद्ध्यापत्तेः । न च कर्तुर्ज्ञानवत्त्वनियमः, शरीरित्वनियमद्वेषेऽपि बीजाऽभावात् । न च कर्तृत्वस्य ज्ञानाऽऽदिघटितत्वात्तत्सिद्धिः, कार्याऽनुकूलकृतिमत एव कर्तृत्वेन तस्य ज्ञानाऽघटितत्वात् । अन्यथाऽऽत्ममनःसंयोगघटितस्याऽपि कर्तृत्व-

स्य निर्वक्तुं शक्यतयेश्वरे तस्याऽपि सिद्धिप्रसङ्गात्। लोके कर्तृत्वस्य दुःखव्याप्यतया ज्ञानादिवन्नित्यदुःखसिद्ध्यापत्तेश्च। नच श्रुतिबाधात्तदसिद्धिः, आकाशोत्पत्तिप्रतिपादकश्रुतेरिवाऽस्या अपि भङ्क्त्या व्याख्याने त्वादृशानां सङ्कोचाऽभावात्। नापि वेदवाक्यानि स्वार्थज्ञानपूर्वकाणि, प्रमाणवाक्यत्वाद् गामभ्याजेति वाक्यवदित्यनुमानात्तत्सिद्धिः। शुकादिवाक्ये व्यभिचारात्। न चोद्दिश्य रचितत्वं हेतुः, वेदस्योद्दिश्य रचितत्वे प्रमाणाऽभावात् पौरुषेयत्वप्रतिपादकश्रुतिस्मृतिविरोधाच्च। तस्माद् वेदैकगम्यं ब्रह्मेति सिद्धम्।

तस्य चोपादानत्वे सति कर्तृत्वं तटस्थलक्षणम्। नच ब्रह्मण उपादानत्वे प्रमाणाऽभावः "तदात्मानं स्वयमकुरुत" इति श्रुतेः, सन् घट इत्यादि प्रतीतेश्च मानत्वात्। नच सन् घट इतिप्रतीतिः सत्ताजातिमेव विषयीकरोति नतु स्वतादात्म्यमिति वाच्यम्, सत्ताजातेस्तद्विषयत्वे सामान्याऽऽदौ सद्बुद्ध्यनापत्तेः। तत्र सत्त्वाऽभावात्। न च सत्तैकार्थसमवायात्तत्र सद्बुद्धिः, गुणादावपि सत्तैकार्थसमवायेनैव सद्बुद्धिसम्भवेन तत्र सत्ताजात्यसिद्ध्यापत्तेः। नच द्रव्यमात्रे सत्ताऽभ्युपगमे द्रव्यत्वेन तुल्यव्यक्तिकत्वं बाधकं, द्रव्यत्वजातिसाधकस्य पाषाणादिसाधारणव्यवहारस्याऽभावेन तस्य जातित्वाऽभावात्। न च गुणसमवायिकारणताऽवच्छेदकतया द्रव्यत्वजातिसिद्धिः, क्रियासमवायिकारणताऽवच्छेदकतया मूर्तत्वस्याऽपि जातित्वाऽऽपत्तेः। अस्तु वा द्रव्यत्वव्याप्यैव सत्ता, नित्यद्रव्यमात्रे तदभ्युपगमात्। अनित्यद्रव्येषु संयुक्तसमवायेनाऽपि सद् बुद्ध्युपपत्तेः। नच

थिवीत्वादिना सङ्करः, तस्याऽदोषत्वात्। तस्मात् पराऽभिन्नसत्ताजातौ प्रमाणाऽभावात् सत्तादात्म्यमेव सद्बुद्ध्यालम्बनमिति सद् ब्रह्म जगदुपादानम्।

उपादानत्वञ्च कार्यतादात्म्यवत्कारणत्वम्। तादात्म्यञ्च न भेदाऽभेदात्मकम्, समानसत्ताकयोर्भेदाऽभेदयोर्विरोधात्। नाप्यत्यन्ताभेदः कार्यकारणभावाऽनुपपत्तेः। किन्तु सत्ताऽनवच्छेदकभेदवत्त्वम्। भेदस्य सत्ताऽनवच्छेदकत्वञ्च सामानाधिकरण्यबुद्ध्यविरोधित्वम्। तथाहि—दण्डघटयोरिव मृद्घटयोरपि भेद एव परन्तु स दण्डघटभेदापेक्षया विलक्षणः, सामानाधिकरण्यबुद्ध्यविरोधित्वात्। अथवा तादात्म्यं पदार्थाऽन्तरमेव, नियतपदार्थवादस्य दूष्यत्वात्। तच्च तत्तत्पदार्थनिरूपितं भिन्नमेवेति न समवायोक्तदोषप्रसङ्गः, तस्मादुभयथाऽपि न दोषः।

कर्तृत्वञ्च कार्याऽनुकूलज्ञानवत्त्वम्, तच्च कार्याऽनुकूलं ज्ञानं ब्रह्मणः स्वरूपात्मकमेव। तदेव तत्तत्सूक्ष्मरूपाऽऽपन्नपदाऽर्थाऽवच्छिन्नं सत्कल्पितभेदेन स्वस्मिन्नपि स्वयं तिष्ठतीति ब्रह्मणः कार्याऽनुकूलज्ञानवत्त्वम्।

यत्त्वविद्यावृत्तिः कार्याऽनुकूलं ज्ञानमिति, तन्न। तस्याः कार्यत्वेनात्राऽपि वृत्यन्तराऽपेक्षायामनवस्थानात्। अनादित्वे च स्वरूपज्ञानेनैवाऽलं, किमविद्यावृत्त्या? नचैवं कर्षकस्याऽङ्कुरम्प्रति कर्तृत्वप्रसङ्गः, कार्यतद्गोचरचिकीर्षाऽन्यतरजनकत्वं हि ज्ञानस्य कार्यानुकूलत्वम्, तच्च कर्षकज्ञाने नास्त्येवेति न तस्य कर्तृत्वम्। चिकीर्षा च कृतिसाध्यत्वप्रमाजन्या विवक्षिता, तेनाऽङ्कुरः कृतिसाध्य इति भ्रमजन्यचिकीर्षामादाय नाऽतिप्रसङ्गः। एतेन कुलालपितु-

घंटकर्तृत्वाऽऽपादनमपि निरस्तम्। तज्ज्ञानस्य कार्यं तद्गोचरचिकीर्षांम्प्रति वा जनकत्वाऽभावादित्याहुः।

वस्तुतस्तु उपादानगोचरकृतिमत्त्वमेव कर्तृत्वम्। ईश्वरेऽप्यनादिवृत्तेरभ्युपगमान्न कर्तृत्वाऽनुपपत्तिः। नचाऽनादिकृतौ प्रमाणाऽभावः, 'विश्वस्य कर्ता' इत्यादि श्रुतेरेव मानत्वात्। करोतीति व्युत्पत्त्या कृतिमत्त्वस्यैव कर्तृशब्दार्थत्वात्। न च ब्रह्मणो जगत्कर्तृत्वे प्रमाणाभावः, "विश्वस्य कर्ता भुवनस्य गोप्ता" इत्यादिश्रुतेः, 'अस्ति कश्चित्स्वतः सिद्धः सत्यज्ञानसुखाऽद्वयः। विश्वस्य जगतः कर्ता पशुपाशविमोक्षणः' इत्यादिस्मृतेश्च मानत्वात्। तस्मादुपादानत्वे सति कर्तृत्वं ब्रह्मणस्तटस्थलक्षणमिति सिद्धम्।

स्वरूपलक्षणन्तु सत्यज्ञानानन्दः, तस्मात् सत्यज्ञानाऽऽनन्दरूपं ब्रह्म वेदैकसमधिगम्यमिति सिद्धम्।

ननु न ब्रह्म वेदैकसमधिगम्यं वेदान्तानामुपासनापरत्वात्। कर्मकाण्डस्य कर्मस्वरूपमात्रप्रतिपादकत्वादिति चेन्न। उपक्रमोपसंहारादितात्पर्यलिङ्गैः सिद्धे ब्रह्मण्येव वेदान्ततात्पर्यस्य भाष्यादौ दर्शितत्वात्। ननु कथं सिद्धवस्तु प्रतिपादनीयं वेदान्तैः, लोके कार्योऽन्वितएव पदानां सङ्केतिग्रहणादिति चेन्न। यथा गङ्गापदस्य प्रवाहे शक्तिग्रहेऽपि गङ्गायां घोष इत्यत्र प्रवाहप्रतिपादने तात्पर्योऽभावात् प्रवाहस्त्यज्यते, एवमत्राऽपि कार्यप्रतिपादने तात्पर्योऽभावात्कार्योऽन्विते शक्तेरपि पदैः कार्यम्परित्यज्य शुद्धब्रह्मण एव लक्षणया प्रतिपादने बाधकाऽभावात्। वस्तुतस्तु न कार्योऽन्विते शक्तिः, किन्त्वन्वितमात्रे पदार्थ-

मात्रे वा लाघवात्। नच ततोऽपि लाघवाज्जातिमात्रे शक्तिः, पदाज्जातिमात्रस्य केनाऽप्यस्मरणात्, विशिष्टोपस्थितेश्च विशिष्टे शक्तिं विना ऽनुपपत्तेः । पदान्नियतोपस्थितेः शक्तिसाध्यत्वात् । नच पदाऽर्थमात्रे शक्तिस्वीकारे ऽन्विते शक्तिरिति विवरणविरोधः, तस्य जातावेव शक्तिरिति-सम्मतान्तरत्वात् । तस्मात् सिद्धब्रह्मप्रतिपादने न काऽप्यनुपपत्तिः ।

ननु सिद्धवस्तुबोधकत्वे वेदान्तानां शास्त्रत्वं न स्यात् । प्रवर्तकं निवर्तकं वा शास्त्रम्, न च सिद्धवस्तुज्ञानात् प्रवृत्तिनिवृत्ती स्तः, तदुक्तम्—"प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तद्धि शास्त्रं प्रचक्षते" इतीति चेन्न । हितबोधकत्वेनैव शास्त्रोपपत्तेः । तथाहि-फलवानज्ञातोऽर्थो वेदेन बोधनीयः न तु कार्यमेव तत्र बीजाऽभावात् । ब्रह्म चाऽज्ञातं, आनन्दाऽवाप्तिश्च तज्ज्ञानैकसाध्येति फलवच्च, तस्मात्तद्बोधकत्वेनैव वेदान्तानां शास्त्रत्वम् । तदुक्तम्—"शास्त्रञ्च हितशासनात्" इति । तस्मान्न सिद्धवस्तुबोधने ऽपि शास्त्रत्वक्षतिः ।

तथाच कर्तृत्वादिविशिष्टः परमेश्वरस्तत्पदस्य वाच्योऽर्थः । कर्तृत्वादिविनिर्मुक्तस्तत्पदस्य लक्ष्यार्थ इति स्थितम् । एतयोश्च तत्त्वम्पदार्थयोरत्यन्तमभेद एव, 'तत्त्वमसि' 'अहं ब्रह्माऽस्मि' इत्यादिश्रुतेः । श्रूयते च परमहंसोपनिषदि—"परमात्मात्मनोरेकत्वज्ञानात्तयोर्भेद एव विभग्नः" इति । "अद्वैते परमस्थितिः" इति च "एकः समस्तं यदिहाऽस्ति किञ्चित्तदच्युतो नास्ति परं ततोऽन्यत् । सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम् ।

सितनीलादिभेदेन यथैकं दृश्यते नभः । भ्रान्तिदृष्टिभिरात्माऽपि तथैकः सन् पृथक् पृथक्" इति विष्णुपुराणात् । "देहं मनोमात्रमिमं गृहीत्वा ममाऽहमित्यन्धधियो मनुष्याः । एषोऽहमन्योऽयमिति भ्रमेण दुरन्तपारे तमसि भ्रमन्ति । विविक्तः क्षेमशरणो मद्भावविमलाशयः । आत्मानं चिन्तयेदेकमभेदेन यथा मुनिः । क आत्मा कः परो वाऽत्र स्वीयः पारक्य एव वा । स्वपराऽभिनिवेशेन विना ज्ञानेन देहिनाम् । विद्याऽऽत्मनि भिदाबाधः" इत्यादि भागवतात् । 'घटाऽऽकाशमहाकाशविभागः कल्पितो यथा । तथैव कल्पितो भेदो जीवात्मपरमात्मनोः । कल्पितोऽयं द्विजा भेदो नाऽभेदं बाधते सदा । कल्पितानामवस्तुत्वादविरोधश्च सिद्ध्यति । महापापवतां नृणां परमाऽद्वैतवेदने । प्रद्वेषो जायते साक्षाद्वेदजन्ये शिवेऽपि च । स यो ह वै तत्परमं ब्रह्म वेद द्विजर्षभाः । ब्रह्मैव भवति ज्ञानान्नास्ति संशयकारणम्' इत्यादिस्मृतिसहस्राच्च ।

न च सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविरुद्धधर्माऽऽक्रान्तयोरभेदस्य बाधितत्वादुक्तश्रुत्यादेरन्याऽर्थता, एकस्मिन्नेवाऽवच्छेदभेदेन संयोगतदभावयोरिवाऽवच्छेदभेदेन सर्वज्ञत्वाऽऽद्युपपत्तेः । अन्तःकरणाऽवच्छिन्नस्य किञ्चिज्ज्ञत्वाद्यनवच्छिन्नस्य सर्वज्ञत्वादीत्यभ्युपगमे बाधकाऽभावात् ।

वस्तुतस्तु विरुद्धधर्माणां मिथ्यात्वादभेदे न काऽप्यनुपपत्तिः । मिथ्यात्वञ्च—स्वाऽनधिकरणाऽनधिकरणाऽत्यन्ताऽभावप्रतियोगित्वम् । स्वस्य मिथ्यात्वेनाऽभिमतस्य यदनधिकरणं घटादि, तदनधिकरणं यस्य ब्रह्मरूपाऽ-

त्यन्ताऽभावस्य, तत्प्रतियोगित्वं मिथ्यात्वमित्यर्थः। अथवा—स्वाऽनधिकरणाऽवृत्तिस्वाऽभाववृत्तित्वं मिथ्यात्वम्।

न च ब्रह्मणोऽत्यन्ताऽभावरूपत्वे प्रमाणाऽभावः, माण्डूक्योपनिषदि उत्तरतापनीये च—"प्रपञ्चोपशमः शिवोऽद्वैतः, प्रपञ्चोपशमं शिवमद्वैतम्" इत्यादि श्रुतेः। "त्वन्मायैषा तन्निषेधं प्रपद्ये" इत्यादिस्मृतेश्च मानत्वात्।

न च विरुद्धधर्माणां मिथ्यात्वे प्रमाणाऽभावः, प्रपञ्चमिथ्यात्वबोधकप्रमाणेनैव तदन्तर्गतधर्माणामपि मिथ्यात्वसिद्धेः। ननु प्रपञ्चमिथ्यात्वमप्यसम्प्रतिपन्नमेवतत्र प्रमाणाऽभावात्। न च "नेह नानास्ति" इति श्रुतिर्मानं, तस्याः ब्रह्मणि सर्वज्ञनिरूपितभेदनिषेधे तात्पर्यात्। न च प्रपञ्चो मिथ्या दृश्यत्वात् शुक्तिरजतवदित्यनुमानेन तत्सिद्धिः। दृष्टान्ताऽसम्प्रतिपत्ते घटः सन्निति प्रत्यक्षबाधाच्च न तस्य मिथ्यात्वम्। तस्माद्विरुद्धधर्माणां सत्यत्वान्न तदाक्रान्तयोरभेदइति चेन्न। 'यच्चिकेत सत्यमित्तं त्वमोघमतोन्यदाता' इत्यादिश्रुतिभिः, 'ईक्षेत विभ्रममिदं मनसो विलासं, दृष्टं विनष्टमतिलोलमलातचक्रम्। विज्ञानमेकमुरुधेव विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः। तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्य स्खलिता मतिर्मम। यथाऽहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे। द्रव्यं कर्म च कालश्च स्वभावो जीव एव च। वासुदेवात्परो ब्रह्मन्नवाच्योऽर्थोऽस्ति तत्त्वतः। स शिवः सत्यचैतन्यसुखाऽऽनन्दस्वलक्षणः। अपरः कल्पितः साक्षात्

ब्रह्मण्यध्यस्तमायया' इत्यादिस्मृतिभ्यश्च प्रपञ्चस्य मिथ्यात्वाऽवधारणात्। ननु यच्चिकेतेति श्रुतिः सत्यत्वमेव बोधयति, नतु मिथ्यात्वमिति चेन्न। श्रुतितात्पर्याऽनवबोधात्। परमेश्वरो यच्चिकेत, यत्पदार्थजातं कर्तव्यतया ऽवगच्छति तन्मायाकार्यत्वात्सत्यं न किन्तु मोघमिति। मोघमेव मिथ्याभूतमेवेति श्रुत्यभिप्रायात्। अतएवोक्तं स्कान्दे—'मायया निर्मितं सर्वं मायैव हि निरूपणे' इति। श्रूयते मैत्रायणीयोपनिषदि चतुर्थप्रपाठके—"इन्द्रजालमिव मायामयं स्वप्नमिव मिथ्यादर्शनम्" इति, "चित्रभित्तिरिव मिथ्यामनोरमम्" इति च। एवमस्थूलाऽऽदिवाक्यपर्यालोचनयाऽपि प्रपञ्चमिथ्यात्वमेव श्रुतितात्पर्यविषयीभूतम्। यत्तु नेह नानेति श्रुतिर्ब्रह्मणि सर्वज्ञप्रतियोगिकभेदनिषेधपरेति, तन्न। त्वन्मते जीवानामसर्वज्ञत्वात्तत्प्रतियोगिकभेदस्य निषेधाऽयोगात्। नच नित्यज्ञानवत्प्रतियोगिकभेदनिषेधपरा, अप्रसक्तस्य तस्य निषेधाऽयोगात्। नच भ्रमप्रसक्तस्य निषेधः धर्मिग्राहकश्रुतिविरोधेनैतादृशभ्रमाऽसम्भवात्। तस्मात्तद्वाक्यं प्रपञ्चनिषेधकमेवेति तत्र प्रतिपन्नस्य तत्रैव निषेधान्मिथ्यैव प्रपञ्चः। तदुक्तम्—"तस्माद्विश्वस्य सर्वस्याऽधिष्ठाने परमाऽऽत्मनि। निषेधान्नेह नानेति मिथ्यात्वं तस्य सिद्ध्यति" इति।

एवमविद्याऽतिरिक्तदोषाऽजन्यं जडं मिथ्या, दृश्यत्वात् शुक्तिरजतवदित्यनुमानेनाऽपि प्रपञ्चस्य मिथ्यात्वसिद्धिः।

नच दृष्टान्ताऽसिद्धिः। मिथ्यारजतोत्पत्त्यनङ्गीकारे इदं रजतमिति भ्रान्तेरेवाऽनुपपत्तेः। तथा हि—न तावदिदं प्रान-

द्वयम्, रजतार्थिनः पुरोवर्तिनि प्रवृत्त्यनापत्तेः । न च स्वतन्त्रोपस्थितेष्टभेदाऽग्रहात्प्रवृत्तिः, तन्मते भेदस्य स्वरूपाऽऽत्मकतया तदग्रहाऽयोगात् । लाघवेनेष्टोपस्थितेरेव प्रवर्तकत्वाच्च ।

नाऽपि पारमार्थिकस्यैव रजतस्योत्पत्तिरिति दिगम्बरमतं साधु, तथात्वे त्रैकालिकबाधाऽनुपपत्तेः ।

नाऽप्यन्यथाख्यातिः, व्यवहितेन समं प्रत्यासत्त्यभावेन चक्षुषा तद्ग्रहणाऽसम्भवात् । ज्ञानस्य प्रत्यासत्तित्वस्य प्राङ्निरस्तत्वेनाऽलौकिकभानाऽसम्भवाच्च । न च दोष एव प्रत्यासत्तिः, दोषस्य प्रत्यासत्तित्वे भ्रमानुमित्युच्छेदप्रसङ्गात् । समाने विषये प्रत्यक्षसामग्र्या बलवत्वात् अप्रामाण्यस्य परतस्त्वमपि लुप्येत, दोषस्य प्रत्यासत्तितया ज्ञानसामान्यसामग्रीप्रविष्टत्वेनाऽप्रमायास्तदतिरिक्तकारणजन्यत्वाऽभावात्। नाऽपि दोषादसन्निकृष्टस्यैव भानं, लाघवेन विशिष्टप्रत्यक्षमात्रे विशेषणसन्निकर्षस्य कारणत्वात् । अन्यथा संवादिप्रवृत्तावेव विशिष्टज्ञानं कारणमिति जितं गुरुणा । तस्मान्नाऽन्यथाख्यातिः सम्भवति ।

नाऽपि बौद्धाद्यभिमता ऽसत्ख्यातिः । असतो ज्ञानविषयत्वाऽनुपपत्तेः । नह्यत्यन्ताऽसति धर्मिणि विषयत्वधर्मः सम्भवति, न वा तत्र रजतत्वादयो धर्माः,तदभावेनेदं रजतमिति ज्ञानस्य रजतं विषय इति कथमध्यवसेयमायुष्मता । नन्वसतो ज्ञानविषयत्वाऽभावे शशशृङ्गं नास्तीत्यादिप्रतीतीनां का गतिरिति चेन्न, । शशशृङ्गशब्दादुत्पन्ने ज्ञानाऽऽभासे सविषयत्वनिषेधाऽभिप्रायत्वात्तद्बाधः । नन्वर्थाऽभावे कथमाभासस्योत्पत्तिः, ताडनेन दुःखात्मकवृत्तेरिव, शुद्धश्रवणेन

तदुत्पत्त्यभ्युपगमात् । नन्वेवमव्युत्पन्नस्याऽपि शङ्खश्रवणा-दाभासोत्पत्तिप्रसङ्गः, अन्वयव्यतिरेकाभ्यां तादृशशक्ति-ज्ञानस्याऽपि तत्र हेतुत्वात् । तस्मान्नाऽसतो ज्ञानविषयत्वम् । तथाच भ्रमविषयीभूतं रजतं तत्रैवोत्पद्यतइति तन्मिथ्यैव ।

तस्य चाऽन्तःकरणाऽवच्छिन्नचैतन्यनिष्ठमवस्थाज्ञानमुपादानम्, वृत्तिनिर्गमनदशायां तस्याऽपि शुक्त्यवच्छिन्नचैतन्यसम्बद्धतया रजताद्युपादानत्वोपपत्तेः । तच्च रजतमन्तःकरणाऽवच्छिन्नचैतन्यसम्बद्धं सदेवोत्पद्यत इति स्वाऽऽकारवृत्तिं विनैव प्रथते ।

नच तत्र रजतोत्पत्तौ सर्वेषां तद्ग्रहप्रसङ्गः, परमते तत्तदपेक्षाबुद्धिजन्यं द्वित्वं तेनैव गृह्यते इतिवत् तत्तदज्ञानारब्धं रजतादि तमेव प्रतिभासते इत्यभ्युपगमात् । अथवा परकीयदुःखादिवत् तत् परं प्रति स्वरूपाऽयोग्यमेव । अतएवाऽन्यजीवम्प्रत्येव स्वरूपाऽयोग्यत्वात् परमेश्वरेण तद् गृह्यते । नचैवं तस्याऽपि भ्रान्तत्वापत्तिः, अनावृतस्वरूपत्वेन तदभावात् ।

एवमनुमानेनाऽपि तस्य मिथ्यात्वसिद्धिः । तथाहि-स्वसमानाऽधिकरणाऽत्यन्ताऽभावाप्रतियोगि शुक्तिरजतं, स्वाऽनधिकरणमात्राऽवृत्त्यत्यन्ताभावप्रतियोगि दृश्यत्वात्, संयोगवत्, इत्यनुमानेन प्रथमनिरुक्तस्य, स्वाऽनधिकरणमात्राऽवृत्त्यभावप्रतियोगि, शुक्तिरजतं प्रतियोगिव्यधिकरणस्वाऽभाववृत्ति दृश्यत्वात्, आकाशाऽत्यन्ताऽभाववत्, रजतं स्वाऽभाववृत्ति दृश्यत्वात्, आकाशाऽत्यन्ताऽभाववत्, सचाऽभावः रजताऽनधिकरणाऽवृत्तिः, सम्बन्धविशेषशालित्वात्, रजतवदित्यनुमानद्वयेन वा, इच्छा अदृष्टद्व्यातिरिक्तद्रव्या

वौदाहृतश्रुत्यादिबलात्प्रपञ्चो मिथ्यैव ।

एवं दृश्यत्वाऽन्यथाऽनुपपत्त्याऽपि प्रपञ्चस्य मिथ्यात्वम्, सत्यत्वे विषयविषयिभावाऽसम्भवात्, ज्ञानज्ञेययोः सम्बन्धाऽभावात् स्वरूपसम्बन्धस्य दूषितत्वात् । किञ्च स्वरूपसम्बन्धत्वादिना ऽप्यतीतादिस्थले विषयाऽसत्वाज्ज्ञानस्वरूपमेव सम्बन्धो वाच्यः । स च ज्ञानस्वरूपमात्रं सकलसाधारणमिति तज्ज्ञानं सकलविषयकं स्यात् स्वरूपाऽऽख्यसम्बन्धस्य सर्वैः समं सत्वात् । तस्मादेतादृशस्थले शुक्तेरप्रसरादाविद्यकसम्बन्धस्यैव वाच्यतया मिथ्यैव प्रपञ्चः । तदुक्तं स्कान्दे—'प्रतीत्या केवलं शक्तिरचिद्रूपा तमोमयी । सर्वप्रकारैर्विद्वद्भिरनिरूप्याऽस्ति शाङ्करी । तया दुर्घटकारिण्या तादात्म्येनैव सङ्गतम्' इति ।

एवं युक्त्यन्तरादपि तस्य मिथ्यात्वम् । सत्यप्रपञ्चवादी प्रष्टव्यो घटः कुत्राऽस्तीति ? यत्र प्रतीयते तत्रैवेति चेद् घटाऽभाववत्यपि स्यात्, दोषात्तत्राऽपि प्रतीतिसम्भवात् । यत्र प्रमीयते तत्राऽस्तीति चेत्, तर्हि प्रमैव कुत्र, यत्र बाधो नास्ति तत्रेति चेत्, यत्र सर्वस्य बाधो नास्ति सा प्रमा उत यस्य कस्यचित् ? नाऽऽद्यः, कालाऽन्तरीयबाधाऽभावस्य निर्णेतुमशक्यत्वात् । नाऽन्त्यः, भ्रमस्थलेऽपि तस्य सुलभत्वात् । तस्मात्कुत्राऽस्तीति प्रमातुमशक्यत्वान्मिथ्यैव घटादिः प्रपञ्चः ।

एवमुत्पत्त्यनुपपत्त्याऽपि घटादेर्मिथ्यात्वम् । तथा हि न तावत्सत उत्पत्तिः विरोधात् । नाऽप्यसतः, शशशृङ्गादेरप्युत्पत्तिप्रसङ्गात्, घटादेरविशेषात् । ननु घटादेः प्रागभावस्य सत्वादुत्पत्तिः, शशशृङ्गस्य तदभावान्नोत्पत्तिरि-

ति चेन्न । प्रागभावस्य निरस्तत्वात् । अस्तु वा प्रागभावः, तावता ऽप्यनुत्पन्नघटेन समं सम्बन्धाऽभावेन तस्य घटीयत्वाऽयोगात् । प्रागभावस्वरूपेणैतदीयत्वे शशशृङ्गीयत्वस्याऽप्यापत्तेः । न च फलबलेन घटीयत्वमात्रताऽभ्युपगमः, स्वरूपस्योभयसाधारण्ये फलस्यैवाऽनुपपत्तेः । अन्यथा फलबलात्किंश्चिदेव जायते किञ्चिन्नेति किं तत्र सामग्रीभेदकल्पनया । ननूत्पत्तेः पूर्वं सदेव कारणेनाऽभिव्यज्यत इति चेन्न । अभिव्यक्तेरपि प्राक् सत्त्वे उत्पत्त्यनुपपत्तेः, असत्त्वे च पूर्वोक्तदोषात् । नन्वेकस्यैवाऽवस्थाभेदमात्रमिति चेन्न । अवस्थायामपि सत्त्वाऽसत्त्वविकल्पग्रासत्रासाऽनपायात् । नन्वेवं कथं सिद्धान्ते सूक्ष्मरूपाऽभ्युपगम इति चेन्न । अस्माकं श्रुत्याद्यवष्टम्भेनैव पदार्थाऽभ्युपगमः, न तु परमत इव युक्त्यवष्टम्भेनेति प्रागुक्तत्वात् । तदुक्तं स्कान्दे "अतीन्द्रियार्थविज्ञाने मानं नः श्रुतिरेव हि । श्रुत्येकगम्ये सूक्ष्मार्थे स तर्कः किङ्करिष्यति । मानाऽनुग्राहकस्तर्को न स्वतन्त्रः कदाचन" इति । तथा च सूक्ष्मरूपे श्रुतिः 'तद्भेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियते' इति । तस्मात्सत्त्वाऽसत्त्वाभ्यां दुर्निरूपतया कार्यं मिथ्यैव । तदुक्तम्–"यथा सतो जनि नैवमसतोऽपि जनि नं च । जन्यत्वमेव जन्यस्य नापिकत्वं समर्थकम्" इति, । तदेतत्सर्वमभिसन्धायोक्तं भागवते–"तस्मादिदं जगदशेषमसत्स्वरूपं, स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् । त्वय्येव नित्यसुखबोधतनावनन्ते मायात उद्यदपि यत्सदिवाऽवभाति" इति । असत्स्वरूपं सद्विलक्षणस्वरूपम् ।

ननु प्रपञ्चस्य मिथ्यात्वे ऽर्थक्रियाकारित्वं न स्यात् ।

शुक्तिरजतादौ तद्दर्शनादिति चेन्न । रजतादेरपि प्रीति-द्वेषाद्यर्थक्रियाकारित्वात् । न च तत्र ज्ञानस्यैवाऽर्थक्रिया-कारित्वं, उदासीनज्ञानादपि तदापत्तेः । रजतादिज्ञानत्वेन जनकत्वे च ज्ञानजनकत्वेन रजतज्ञानत्वेन वेत्यत्र नियाम-काऽभावादुभयोरपि जनकत्वात् । न चाऽतीतादावर्थोऽ-भावाद् ज्ञानस्यैव जनकता, अतीतादेरपि सूक्ष्मरूपेणाऽऽमो-क्षं सत्त्वात्। अन्यथा विषयतयाऽवच्छेदकत्वस्याऽप्यसम्भ-वात् । नन्वेवमपि शुक्तिरजतादिविलक्षणाऽर्थक्रियाकारित्वं न स्यादेवेति चेन्न । व्यावहारिकत्वेन तदुपपत्तेः । तदुक्तं स्कान्दे—"कल्पितानामवस्तूनां मध्ये केचन मायया । परमाऽर्थतया क्लृप्ता व्यवहारे सुरर्षभाः । आकाशादि जगच्छुक्तिरूप्ये ते कथिते मया" इति । पराशरोपपुराणे सप्त-दशेऽध्यायेऽप्युक्तम्—"शुक्तिकाव्यवहारे तु सती न रज-तोपमा" इति ।

नन्वेवमपि स्वर्गादेर्मिथ्यात्वे तत्साधनताबोधकवेद-स्याऽप्रामाण्याऽऽपत्तिरिति चेन्न । द्विविधं प्रामाण्यम् । अबाधितार्थबोधकत्वरूपं, अविद्याऽतिरिक्तदोषाऽजन्यप-दार्थबोधकत्वरूपञ्च। इदमेव व्यावहारिकं प्रामाण्यं तदुभय-मपि वेदेऽस्ति। कर्मकाण्डादिमहातात्पर्यविषयीभूतब्रह्मणो बाध्यत्वात् । अवान्तरतात्पर्यविषयीभूतस्य स्वर्गसाधन-त्वादे र्व्यावहारिकत्वात् । तदुक्तं स्कान्दे—"व्यावहारिकस-त्याऽर्थं साक्षात्सत्यार्थचिद्घनम् । उभयं वक्ति वेदस्तु मार्गो नैवं वदन्ति हि" इति। तस्मान्मिथ्यैव प्रपञ्चः ।

न च घटः सन्नित्यादिप्रत्यक्षबाधः, तस्य विद्यमान-तामात्रविषयत्वेन निरुक्तमिथ्यात्वाऽबाधकत्वात् । देहाऽऽ-

स्वप्रत्यक्षवन्निर्णीततात्पर्यकश्रुतिबाधितत्वेनाऽप्रमाणत्वाच्च । अनुमानादिबाधेऽप्येतदेवोत्तरम् । तस्मात्प्रपञ्चाऽन्तर्गतसर्वज्ञत्वकिञ्चिज्ज्ञत्वादिधर्माणां कल्पितत्वेन तदाक्रान्तयोर्जीवपरयोस्तत्त्वमस्यादिश्रुत्याऽभेदबोधने न काऽप्यनुपपत्तिः ।

तत्त्वमस्यादिश्रुतिश्चाऽखण्डाऽर्था, लक्षणया चिन्मात्रबोधकत्वात् । तथा च प्रयोगः—'तत्त्वमस्यादिवाक्यं, स्वपदोपस्थापितपदार्थनिरूपितसंसर्गाऽगोचरप्रमितिजनकं, एकप्रातिपदिकाऽर्थमात्रतात्पर्यकत्वात्, सोऽयं देवदत्त इत्यादिवाक्यवत्' इति । ननु कथं वाक्यस्याऽखण्डार्थत्वम्, तस्य संसृष्टार्थबोधकत्वस्वाभाव्यात् । चिन्मात्रस्य तत्पदार्थैकदेशस्य तत्पदघटितवाक्यार्थत्वाऽयोगाच्च । एवं लक्षणयेत्यपि न युक्तम्, लक्षणाबीजाऽन्वयानुपपत्त्यभावात् । न च तत्त्वम्पदयोर्विशिष्टवाचकत्वाद्विशिष्टयोश्च समानसत्ताकभेदाऽयोगाच्चिन्मात्रलक्षणा पदद्वयेऽप्याऽवश्यकीति वाच्यम् । 'दण्डी कुण्डली' इति वाक्येनैकस्मिन्नेव पुरुषे दण्डकुण्डलवैशिष्ट्यवत् तत्त्वमसीति वाक्येनाऽप्येकस्मिन्नेव चैतन्येऽहङ्कारादिवैशिष्ट्यबोधनसम्भवात् । ननु दण्डकुण्डलयोरविरोधात्तद्वैशिष्ट्यमेकस्मिन् बोध्यतां नाम, प्रकृते तु विरुद्धविशेषणद्वयवैशिष्ट्यं कथमेकत्र बोधनीयमिति चेन्न । अवच्छेदभेदेनाऽविरोधस्य त्वयैवोपपादितत्वात् । तस्मान्न लक्षणा, न वाऽखण्डार्थतेति चेदुच्यते—लोके वेदे च तात्पर्याऽनुपपत्तिरेव लक्षणाबीजं न त्वन्वयाऽनुपपत्तिः, 'कृष्णेयं गौः यतो बहुक्षीरा' 'वायुर्वै क्षेपिष्ठा देवता' इत्यादिप्राशस्त्यप्रतिपादकाऽर्थवादवाक्येषु तदभावेऽपि तात्पर्याऽनुपपत्त्यैव

लक्षणाकल्पनात् । एवञ्च प्रकृतेऽप्युपक्रमोपसंहारादितात्पर्यलिङ्गैः शुद्धेऽद्वितीयब्रह्मणि सर्ववेदान्ततात्पर्याऽवधारणात् तदनुरोधेन लक्षणा । तथा च तत्त्वम्पदाभ्यां विशिष्टे शक्ताभ्यां जहांऽशं परित्यज्य भागत्यागलक्षणया चिन्मात्रं बोध्यत इति भवति वाक्यमखण्डार्थम् । तदुक्तं ब्रह्मगीतायाम्--"एवं महाशब्दलक्ष्यार्थः साक्षात्प्रत्यक् चितिः परा । तच्छब्दस्य च लक्ष्यार्थः सैव नाऽत्र विचारणा । तदर्थैक्यविरुद्धांऽशं त्यक्त्वा वाच्यगतं श्रुतिः । अविरुद्धचिदाकारं लक्षयित्वा ब्रवीति हि । तत्त्वं शब्दार्थलक्ष्यस्य चिन्मात्रस्य पराऽऽत्मनः । एकत्वं वस्तुतः सिद्धं स हि वाक्यार्थ आस्थितः" इति । अखण्डार्थत्वञ्च--समभिव्याहृतपदोपस्थापितपदार्थनिरूपितसंसर्गाऽगोचरप्रमितिजनकत्वम् । 'अप्राप्तयोः प्राप्तिः संयोगः' इत्यादिलक्षणवाक्ये ऽव्याप्तिवारणाय समभिव्याहृतपदोपस्थापितपदार्थनिरूपितेति, 'जलेन सिञ्चति' इत्यादिवाक्यात्पदद्वयेऽपि शक्तिभ्रमाज्जायमानस्य घटवति घटोऽस्तीत्यादिज्ञानस्याऽपि प्रमात्वात्तत्राऽतिव्याप्तिवारणायोपस्थापितेति । नन्वसम्भवीदं लक्षणं, समभिव्याहृताभ्यां तत्त्वम्पदाभ्यां लक्षणयोपस्थितस्य चैतन्यस्याऽभेदरूपसंसर्गप्रतिपादनादिति चेन्न । अभेदस्याऽसम्बन्धत्वात् । अन्यथा घटस्य घट इति धीप्रसङ्गात् । नन्वारोपे सति निमित्ताऽनुसरणं, न तु निमित्तमस्तीत्यारोप इति चेन्न । नूनमनयैव वाचोभङ्ग्या केनचिद् धूर्तेन प्रतारितोऽसि भवान् । ननु रे यदि सामग्र्यां सत्यामपि कार्यं नापादनीयं, तर्ह्युच्छिन्नं पदार्थवैजात्येन । तथाहि--घटे पटत्वं, अश्वे गोत्वं, एवमपि पशुत्वमित्याद्यप्यस्तु । न च घटादौ पटत्वाऽऽद्यनुप-

लक्षिधर्माधिका, आरोपे सतीत्यादिमन्त्रस्य तत्राऽपि पठितुं शक्यत्वात्। किञ्चैवमभावमात्रमुच्छिन्नम्, सर्वत्र सर्वे पदार्थास्तिष्ठन्ति तदुपलम्भकसामग्र्यपि तिष्ठत्येव। अथाऽपि नोपलभ्यन्ते, आरोपे सति निमित्ताऽनुसरणमित्य-भ्युपगमात्। तस्माद्यत्किञ्चिदेतत् तस्मादभेदस्याऽसम्बन्ध-त्वादखण्डार्थलक्षणं सुस्थम्।

यत्तु वाक्यस्य संसर्गबोधकत्वस्वाभाव्यमिति, तत्संसर्ग-परवाक्ये एव, न तु स्वरूपपरवाक्येऽपि। यदपि पदार्थैकदेशस्य वाक्याऽर्थत्वाऽयोग इति, तदपि संसर्गपरवाक्य एव। चैतन्य-स्य पदत्रयप्रतीतिविशेष्यतयैकदेशत्वाऽभावाच्च।

नन्वेवमपि न वाक्यस्याऽखण्डार्थता युक्ता, तथात्वे सर्वपदलक्षणाऽऽपत्तेः। किन्त्वेकस्मिन् पदे एव लक्षणा। तथा च 'तत्त्वमसि' इति वाक्यस्य, त्वं तन्नियम्योऽसि, तत्स-दृशोऽसीति वाक्याऽर्थ इति चेन्न, त्वदभ्युपगतैकपदलक्षणाया अपि जहल्लक्षणात्वेनाऽस्मदभिमतपदत्रयलक्षणाऽपेक्षया जघन्यत्वात्। तथाहि—अजहल्लक्षणायां न सर्वाऽऽत्मना स्वार्थत्यागः, न वाऽस्वार्थपरिग्रहः, किन्तु वाच्यैकदेशस्य प्रकृतेऽनन्वयात्तात्पर्यविषयत्वाच्च त्यागमात्रम्। तथा चेयं लक्षणा शक्तिसमकक्षेति त्वदभ्युपगतैकपदलक्षणाऽ-पेक्षया लघीयसी। न चाऽसिपदे तत्राऽपि जहल्लक्षणैवेति वाच्यम्, तत्राऽपि वाच्यकोटिप्रविष्टाऽस्तित्वस्य ब्रह्मरूप-तया तत्त्वमादिपदादविशेषात्। तस्मात्सर्वपदलक्षणाऽ-पीयं त्वदभ्युपगतलक्षणाऽपेक्षया लघीयसीति वाक्यम-खण्डार्थम्।

ननु वाक्ये ज्ञानस्य चिन्मात्रविषयकत्वे, ततोऽविद्या-

निवृत्ति र्न स्यात्, सप्रकारकज्ञानस्यैवा ज्ञाननिवर्तकत्वात् । अन्यथा घटनिर्विकल्पकादपि घटाऽज्ञाननिवृत्त्यापत्तेरिति चेन्न । समानविषयनिश्चयस्यैवाऽविद्यानिवर्तकत्वात् । नचैवं निर्विकल्पकादप्यज्ञाननिवृत्त्यापत्तिः, शब्दनिर्विकल्पकादेव ब्रह्माऽज्ञाननिवृत्तेरभ्युपगमेनेष्टाऽऽपत्तेः । नचाऽशाब्दनिर्विकल्पकादपि तदापत्तिः, तादृशनिर्विकल्पके प्रमाणाभावात् । नच विशिष्टज्ञानस्य विशेषणज्ञानजन्यत्वात्तत्सिद्धिः, विशेषणत्वविशेष्यत्वाऽभावत्वादिविशिष्टबुद्धौ व्यभिचारेण जनकत्वाऽसिद्धेः । नच पञ्च प्रकाराः पूर्वानुपस्थिताअपि भासन्ते नाऽन्ये इति वाच्यम् । पञ्चवदन्येषामिति भानसम्भवेनाऽप्रयोजकत्वात् । विशिष्टप्रत्यक्षस्य विशेषणसन्निकर्षमात्रसाध्यत्वात् । अन्यथा शाब्दज्ञाने, आनुमानिकज्ञाने, प्रत्यक्षविशेषादौ च क्लृप्तत्वेन यद्विशेषणयोरिति न्यायेन विशिष्टज्ञाने विशेष्यज्ञानस्याऽपि कारणत्वपत्तात् । नचाऽभावविशेष्यकबुद्धौ व्यभिचारान्न तस्य कारणता, अभावनिर्विकल्पकाऽभ्युपगमेन व्यभिचारपरिहारस्य सुकरत्वात् । न चाऽभावस्य सविकल्पकैकवेद्यता नियमः, अप्रयोजकत्वात् । वस्तुतस्तु विशिष्टज्ञानस्य विशेषणज्ञानजन्यत्वेऽपि न निर्विकल्पकसिद्धिः, घटत्वादेर्जन्मान्तराऽनुभूतस्य स्मरणरूपविशेषणज्ञानसम्भवात् । अभिनवदेवदत्तादिबोधस्त्वाद्यो जातिविशेष्यको व्यक्तिविशेषणक एवाऽस्तु । नचैवं व्यक्त्यंशे प्रकारस्य पूर्वमभानात्तन्निर्विकल्पकसिद्धिरिति वाच्यम् । तत्र रूपादेरेव प्रकारतया भानात् । रूपेऽपि जन्मान्तराऽनुभूतं रूपत्वादि प्रकारतया भासते इति न काऽप्यनुपपत्तिः । एवं सर्वत्र

विशिष्टधीसम्भवे किं निर्विकल्पेन । जन्मान्तरीयसंस्कारादिकल्पनञ्च परस्याऽपि क्वचिदावश्यकम्, अन्यथेष्टसाधनताज्ञानाऽभावेन स्तनपाने प्रवृत्त्यनुपपत्तेः । यत्तु 'घटः' इत्येवंरूपविषयिताविशेषशालिनि ज्ञाने घटत्वांशे किञ्चिद्धर्माऽप्रकारकं घटत्वज्ञानं कारणम् । अतएव 'सामग्रीद्वयसमाजाद्विलक्षणविषयिताद्वयशाली जातिमान् घटः' इत्याकारको बोधइति तदनुरोधेन निर्विकल्पकसिद्धिरिति । तन्न । एवं सत्यस्मदादीनां युधिष्ठिरादिपदेभ्यो युधिष्ठिरत्वादिप्रकारकबोधानापत्तेः । अस्माकं युधिष्ठिरत्वादिनिर्विकल्पकाऽभावेन तादृशविशिष्टाऽनुभवाऽभावे पदात्तादृशस्मरणस्याऽप्यसम्भवात् । तदर्थञ्च प्रकाराऽन्तराऽनुसरणे किं निर्विकल्पेन । तस्मादशाब्दनिर्विकल्पके प्रमाणाभावान्न तस्मादज्ञाननिवृत्तिः ।

नन्वेमपि वाक्यस्याऽखण्डार्थत्वे वाक्यत्वमेव भज्येत । तथा हि—आकाङ्क्षा योग्यताऽऽसत्तिमत्पदकदम्बकत्वं वाक्यत्वम् । आकाङ्क्षादिकञ्चाऽन्वयस्यैव वाक्यार्थत्वे सङ्गच्छते । यस्य पदस्य येन पदेन विना यदन्वयाऽननुभावकत्वं तत्तेन साकाङ्क्षमित्यननुभावकत्वमेवाऽऽकाङ्क्षा । स्वप्रतिपाद्याऽन्वयाऽबाधो योग्यता । अन्वयप्रतियोग्युपस्थितिरासत्तिरिति तासामन्वयघटितत्वादिति चेन्न । यस्य पदस्य येन पदेन विना यदर्थाऽननुभावकत्वं साऽऽकाङ्क्षा । वाक्यार्थाऽबाधो योग्यता । अव्यवधानेन स्वार्थोपस्थितिरासत्तिरिति तासामन्वयाऽघटितत्वेनाऽन्वयाऽबोधकत्वेऽपि वाक्यत्वोपपत्तेः ।

ननु तत्त्वमसीति वाक्ये त्वम्पदे लक्षणाऽस्तु,

तस्याऽहङ्कारशबलचैतन्यवाचकत्वात् तत्पदे किमिति लक्षणा । तेन शक्त्यैव शुद्धस्योपस्थानसम्भवात् । न च तत्पदस्य बुद्धिस्थवाचकत्वाच्छुद्धस्य च कृत्स्नप्रकरणस्य तत्र तात्पर्यग्रहं विना ऽनुपस्थितेस्तत्प्रकरणाऽन्तर्गततत्त्वमसीतिवाक्यस्थतत्पदस्याऽपि शक्त्या विशिष्टोपस्थापकत्वमेवेति वाच्यम् । श्रवणेन शुद्धे तात्पर्यबोधाऽनन्तरं मननाऽद्युत्तरकालं यस्तत्त्वमस्यादिवाक्येन साक्षात्कार उत्पाद्यते, तदानीं शुद्धस्याऽपि बुद्धिस्थत्वेन तत्पदेन शक्त्यैव तदुपस्थापनसम्भवे लक्षणावैयर्थ्यादिति चेन्न । सर्वनाम्नां बुद्धिस्थत्वविशिष्टवाचकत्वेन तत्पदेऽपि लक्षणाया आवश्यकत्वात् । अन्यथा सर्वनाम्नां नानार्थताऽऽपत्तेः । शक्यताऽवच्छेदकानां घटत्वादीनां नानात्वात् । न च घटत्वादीनां बुद्धिस्थत्वेनाऽनुगमान्न नानार्थतेति वाच्यम् । तथा सति नानांऽर्थोच्छेदप्रसङ्गात् । अश्वत्वलवणत्वादीनामपि बुद्धिस्थत्वेनाऽनुगमस्य कर्तुं शक्यत्वात् । तस्मात्सर्वनाम्नां बुद्धिस्थत्वप्रकारकज्ञानजनकत्वात्तत्पदे ऽपि लक्षणा । तस्मात्सिद्धं तत्त्वमस्यादिमहावाक्यस्याऽखण्डार्थत्वम् ।

एवं 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्याद्यवान्तरवाक्यमप्यखण्डाऽर्थम् । स्वरूपमात्रप्रश्नोत्तरत्वात् । प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवत् । ननु दृष्टान्तः साध्यविकलः, तथा हि-अस्ति तावदस्मिन् ज्योतिर्मण्डले कश्चन्द्र इति प्रश्नः, स च न चन्द्ररूपमात्रविषयकः, स्वरूपमात्रस्य चक्षुषैव निर्णयात् । किन्त्वसाधारणधर्मविषयः, चन्द्रपदवाच्यत्वविषयो वा, अतद्व्यावृत्तिविषयको वेति प्रकृष्टप्रकाश इत्युत्तरवाक्यस्याऽपि धर्मादिवैशिष्ट्यमेवाऽर्थ इति चेन्न ।

प्रकाशादिवैशिष्ट्यस्याऽपि तेन पूर्वमेव निर्णीतत्वात् । चन्द्राऽसाधारणधर्मवान् चन्द्र इति जानामि, चन्द्रश्चन्द्रपदवाच्य इति च जानामि, चन्द्रोऽचन्द्राद्व्यावृत्त इत्यपि जानामि, चन्द्रस्वरूपमेव परं न जानामीति प्रश्नविवरणाच्च स्वरूपमात्रविषयक एव प्रश्नः । स्वरूपमपि चक्षुषा निर्णीतमिति चेन्न । तस्य ज्ञानस्याऽनवधारणाऽऽत्मकतया संशयनिवर्तनाऽसमर्थत्वात् । नन्वेवं धर्मादिविषयक एव प्रश्नोऽस्तु, तद्विषयकज्ञानस्याऽप्यनवधारणत्वेन तस्य प्रश्नविषयत्वोपपत्तेरिति चेन्न । चन्द्रस्वरूपमेव परं न जानामि तद्वदेति तदीयवचनेनैव तदीयप्रश्नस्य स्वरूपमात्रविषयत्वाऽवधारणात् । तस्मात्स्वरूपमात्रस्य पृष्टत्वात्तदुत्तरमपि स्वरूपमात्रविषयकमेव । अन्यथा ऽऽम्रप्रश्ने कोविदारोत्तरवत्प्रश्नप्रतिवचनयोर्वैयधिकरण्यप्रसङ्गात् । नन्वेवमपि प्रकृष्टप्रकाशादिपदैर्लक्षणया स्वरूपमात्रबोधने कथं तस्मात्संशयनिवृत्तिः । अन्यथा यः कश्चिच्चन्द्र इति वाक्येनाऽपि स्वरूपे बोधिते ततोऽपि संशयनिवृत्तिः किन्न स्यादिति चेन्न । यदीयं व्यक्तिश्चन्द्रो न स्यात्तर्ह्ययं प्रकृष्टप्रकाशादिपदैर्लक्षणया नोपस्थापयेदित्यनुकूलतर्कसहकारेण स्वरूपमात्रगोचरज्ञानेनाऽपि संशयस्य निवर्तयितुं शक्यत्वात् । यः कश्चिदिति वाक्यश्रवणे चैतादृशतर्काऽनवतारात्ततः संशयाऽनिवृत्तेः । तस्मात्सिद्धं प्रकृष्टप्रकाश इति वाक्यस्य स्वरूपमात्रप्रश्नोत्तरत्वादखण्डार्थत्वम् ।

तथा च तद्दृष्टान्तेन सत्यं ज्ञानमनन्तमित्यादि वाक्यमप्यखण्डार्थमेव ।

तथाहि—'ब्रह्मविदाप्नोति परम्' इत्युपक्रमे ब्रह्मज्ञाना-त्पुरुषाऽर्थश्रवणात्तद्ब्रह्म किमित्याकाङ्क्षायां प्रवृत्तमिदं वाक्यं तन्मात्रप्रश्नोत्तरमेव ।

तथा चाऽत्रापि स्वरूपमात्रबोधाऽर्थं सर्वपदलक्षणा । ननु सत्यादिषु किमिति लक्षणा, ब्रह्मणः सत्यस्वरूपतया सत्यपदस्य ज्ञानादिस्वरूपतया ज्ञानादिपदानाञ्च तत्र शक्त्यैव सम्भवात् । ब्रह्माऽतिरिक्तस्य मिथ्यात्वेन जडत्वेन च सत्याऽऽदिपदवाच्यत्वाऽयोगेन ब्रह्मणोऽप्यवाच्यत्वे तेषां निरर्थकत्वप्रसङ्गाच्च । लक्षणाबीजाऽन्वयानुपपत्त्यभा-वाच्च । नीलमुत्पलमिति वाक्यइवाऽत्राऽपि सत्यत्वादिवै-शिष्ट्यस्यैव वाक्यार्थत्वसम्भवात् । तस्मान्न लक्षणेति चेन्न । सत्यादिपदानां शुद्धब्रह्मवाचकत्वे तेषां पर्यायताऽऽ-पत्तेः । तथा च पर्यायाणां सहप्रयोगाऽनुपपत्तेः सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतिरपार्थिकैव स्यात् । तथा च सत्य-पदस्य बाधाऽयोग्यत्वरूपधर्मविशिष्टे चैतन्ये शक्तिः, ज्ञानपदस्य चक्षुरादिजन्यवृत्तिविशिष्टे, अनन्तपदस्य त्रिविधपरिच्छेदशून्यत्वविशिष्टे, ब्रह्मपदस्य सर्वाऽऽत्मता-योग्यत्वविशिष्टे, एवं दोषाऽभावादिविशिष्टे शुद्धादिप-दानामिति न केवलं ब्रह्मणि कस्याऽपि शक्तिः । न चाऽ-सत्यस्य बाधाऽयोग्यत्वस्य सत्यपदवाच्यत्वम्, अज्ञानात्मि-काया वृत्तेर्ज्ञानपदवाच्यत्वम् । अत एव ब्रह्मादिरूपाणां ब्रह्मादिशब्दवाच्यत्वञ्च विरुद्धमिति वाच्यम् । तन्मतेऽ घटस्य घटत्वस्य घटशब्दवाच्यत्ववदस्याऽप्यविरुद्धत्वात् । न चाऽन्वयाऽनुपपत्त्यभावाल्लक्षणाऽनुपपत्तिः, तात्पर्याऽनुपपत्ते-रेव लक्षणाबीजत्वस्य प्रागुपपादितत्वात् । यथाऽत्रा-

सत्यत्वादिविशिष्टं वाक्यार्थः, स्वरूपमात्रस्य बुभुत्सितत्वेन तस्यैव वाक्याऽर्थत्वात्। तस्माच्छुद्धं ब्रह्म सर्वपदाऽवाच्यम्।

ननु न ब्रह्म सर्वपदाऽवाच्यम्, वाच्यपदवाच्यत्वात्। न च तेनाऽपि लक्ष्यते, ब्रह्माऽतिरिक्तस्याऽवाच्यपदमुख्यार्थस्याऽभावेन लक्षणाऽनुपपत्तेरिति चेन्न। अवाच्यमित्यस्य वाक्यत्वेन पदत्वाऽभावात्। पदत्वे वा ऽवाच्यत्वधर्मविशिष्टस्यैव वाच्यत्वेन शुद्धस्याऽवाच्यत्वात्। नन्वेवमपि लक्ष्यपदवाच्यमेव ब्रह्म, लक्ष्यसम्बन्धस्यैव लक्ष्यपदवाच्यताऽवच्छेदकत्वात्। तस्य च ब्रह्मण्यपि सत्त्वादिति चेन्न। तस्याऽपि यौगिकत्वेन वाक्यतुल्यत्वात्। तेनाऽपि लक्ष्यत्वविशिष्टब्रह्मण एवाऽभिधानाच्च। एतेन निर्विशेषस्वप्रकाशनिर्गुणादिशब्दानां ब्रह्मणि शक्तिः स्यादिति निरस्तम्। तस्मात्सिद्धं शुद्धे ब्रह्मणि न कस्याऽपि पदस्य शक्तिरिति। तथा च श्रुतिः "यतो वाचो निवर्तन्ते" इति।

न चाऽनया श्रुत्या लक्षणाऽपि निषिध्यते इति वाच्यम्। अस्याः श्रुतेः पूर्वोक्तन्यायसिद्धार्थाऽनुवादितया शक्तिमात्रनिषेधद्वारा निर्गुणब्रह्मपरत्वात्। अन्यथा "तत्वौपनिषदं पुरुषं पृच्छामि" इत्यादिश्रुतिसिद्धौपनिषदत्वबाधप्रसङ्गात्। वृत्तिमात्रनिषेधे तया विना शब्दस्य बोधकत्वाऽयोगात्। न च "वचसा वाच्यमुत्तमम्" इति माध्वोदाहृतश्रुतिविरोधः, तस्याः श्रुतित्व एव विप्रतिपत्तेः। अस्तु वा श्रुतित्वं, तावताऽपि शुद्धे शक्तिरिति कुतः? विशिष्टशक्तिप्रतिपादनेनाऽप्येतस्य वचनस्य चरितार्थत्वात्। अन्यथा पर्यायताऽऽपत्तेश्चक्त्वाच्च। तस्माच्छक्तेरेव मुख्यप्रतिहत्वाल्लक्षणायाश्चाऽर्थ-

द्वारकप्राप्तित्वेन गौणत्वान्मुख्याऽप्राप्तिरेव यतो वाच इति श्रुत्या निषिध्यत इति ।

स्यादेतत्, ब्रह्मणः सत्याऽऽदिपदलक्ष्यत्वे गङ्गापदलक्ष्यस्याऽगङ्गात्ववत्सत्यादिपदलक्ष्यस्याऽसत्यत्वाद्यापत्तिः । तथा च न ब्रह्मणः सत्यज्ञानानन्दात्मत्वम्, नवाऽद्वैतमिति साधु समर्थितो ब्रह्मवादः ।

किञ्च सर्वपदलक्षणापक्षे पदाऽन्तरमपि व्यर्थं, एकेनैव पदेन सत्यज्ञानानन्दात्मकस्य ब्रह्मणो लक्षितत्वात् । तस्मान्न सर्वपदलक्षणा, नवाऽखण्डार्थतेति चेन्न । सत्यादिपदेन विशिष्टवाचिना ऽसत्याऽनानन्दादिरूपविशेषणत्यागपूर्वकं वस्तुतः सत्यादिस्वरूपस्यैव लक्षितत्वेन सत्यादिपदलक्ष्यस्यापि सत्याद्यात्मत्वोपपत्तेः । 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र काकपदलक्ष्यस्याप्यकाकत्वाभाववदानन्दपदलक्ष्यस्याप्यनानन्दत्वाऽभावोपपत्तेश्च । दृष्टान्ते तु जहल्लक्षणाऽभ्युपगमात् तत्र च वाच्यं गङ्गास्वरूपं मुख्यं परित्यज्याऽगङ्गात्मकतीरस्यैव लक्षितत्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् । यत्तु पदान्तरं व्यर्थं, तन्न । ज्ञानाऽऽदिपदैर्ज्ञानात्मकवृत्तित्यागपूर्वकं स्वरूपाऽनुपस्थापने ब्रह्म ज्ञानस्वरूपं न वा, ऽऽनन्दस्वरूपं नवेत्यादि संशयाऽनिवृत्तेः । तस्मात्सत्याद्यात्मकमपि ब्रह्म सत्यादिपदलक्ष्यमिति सिद्धम् ।

नन्वेवमपि शक्यसम्बन्धितया ज्ञाते शुद्धे लक्षणा वाच्या । शक्यसम्बन्धितया ज्ञानं च न प्रमाणान्तरेण, ब्रह्मण औपनिषदत्वात् । तथा च लक्ष्यं किमिति शिष्येण गुरुं प्रति पृष्टे सति तच्छब्दान्तरेण बोधनीयं गुरुणा,

सोऽपि शब्दो लाक्षणिकश्चेत्तत्राऽपि लक्ष्यं किमिति पृष्टे शब्दाऽन्तरेणैव वक्तव्यम् । सोऽपि शब्दो लाक्षणिकश्चेदनवस्थेति भ्रान्तस्य गुरोरपि मूकता । शिष्यस्य लक्ष्यस्य स्वरूपाऽप्रतिपत्तिश्चेति सम्यग्व्युत्पादितं वेदान्तरहस्यमिति चेन्न । शुद्धस्य स्वप्रकाशत्वेनोपस्थितत्वाच्छक्यसम्बन्धग्रहोपपत्तेः ।

अथवा तर्काच्छुद्धोपस्थितिः । तथाहि-सत्याऽऽदिपदानि विशिष्टवाचकानि, विशिष्टानाञ्च सतानततारूभेदवत्त्वादभेदो बाधितः । समानाधिकरणपदानाञ्चैकस्मिन्प्रातिपदिकार्थे तात्पर्यम् । ब्रह्माऽतिरिक्तञ्च मिथ्यात्वात्तत्त्वावेदकश्रुत्या तात्पर्यतः प्रतिपाद्यमिति गुरुणा व्युत्पादितस्य शिष्यस्य सत्यं ज्ञानमनन्तं ब्रह्मेति वाक्यं श्रुतवतः यदि सत्यादिपदवाच्यसम्बन्धिज्ञानादिरूपमेकं वस्तु न भवेत्तर्हि सत्यादिपदानां सामानाधिकरण्यं वाक्यस्यैकार्थपरत्वञ्च बाधितं स्यादिति तर्केण वाच्यसम्बन्धितया शुद्धोपस्थितिसम्भवात् । तस्मात्सत्यादिपदलक्षणायां न काऽप्यनुपपत्तिः ।

स्यादेतत् । सर्वपदलक्षणापक्षे वाक्यमबोधकमेव स्यात्, लाक्षणिकपदानामननुभावकत्वात् । नह्यशक्तस्य बोधजनकत्वं सम्भवति, सर्वत्र शक्तस्यैव कार्योत्पादकत्वादिति चेन्न । लाक्षणिकस्याऽननुभावकत्वे यत्र कमले लक्षणया द्विरेफशब्दः प्रयुक्तः, नीलं द्विरेफमानयेत्यादौ तत्र शाब्दबोधो न स्यात् । तत्र नीलद्विरेफशब्दयो लाक्षणिकतया स्वार्थाऽन्वयबोधकत्वाऽसम्भवात् ।

किञ्चैवं प्राशस्त्यबोधकाऽर्थवादवाक्यानामप्यबोधकता-ऽऽपत्तिः । तत्र सर्वैः पदैर्लक्षणया प्राशस्त्यस्योपस्थापनात् ।

वस्तुतस्तु पदार्थोपस्थापकपदत्वेनैव शाब्दबोधजनकत्वं, नतु तच्छक्तपदत्वेन गौरवात् । नानार्थस्य वस्तुतस्तत्र शक्तस्याऽपि शक्त्यग्रहदशायां तदनुपस्थापकतया ऽननुभावकत्वाच्च, सहश्रुतपदानां सम्भूयानुभावकत्वव्युत्पत्तेश्च । तस्माल्लाक्षणिकं नानुभावकमिति प्रक्रियामात्रम् । तस्माद्युक्तमेव सत्यादिवाक्यानां लक्षणया ऽखण्डार्थत्वम् ।

ननु सत्याद्यवान्तरवाक्यस्याऽप्यखण्डचिन्मात्रबोधकत्वे किं तत्त्वमस्यादिमहावाक्येन, तद्बोध्यचिन्मात्रस्याऽवान्तरवाक्यैरेव बोधितत्वात् । न च भेदभ्रमो महावाक्योत्थज्ञानं विना न निवर्तते इति वाच्यम्, अद्वितीयब्रह्मस्वरूपाऽवगमे सत्याऽऽदिवाक्यान्निष्पन्ने सति तदयोगात् । तस्मादवान्तरवाक्यस्याऽप्यखण्डार्थत्वे महावाक्यवैयर्थ्यं दुष्परिहरमिति चेन्न । अवान्तरवाक्यानां महावाक्यशेषतया तेषां पदार्थमात्रतात्पर्यकत्वेन जीवब्रह्माभेदस्य ततोऽवगमेऽपि तत्र तस्य तात्पर्याऽभावात् । अन्यथा 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादिवाक्यानामपि वैयर्थ्यप्रसङ्गात् । 'सर्वेभ्यो ज्योतिष्टोमः' सर्वेभ्यो दर्शपूर्णमासौ, 'सर्वेभ्यश्चातुर्मास्यानि' इति वाक्येन तेषां सर्वफलकत्वे बोधनात् सर्वमध्ये स्वर्गस्याऽप्यन्तर्भूतत्वात् । यदि च ज्योतिष्टोमेनेत्यादिवाक्यसार्थक्यार्थमेव 'सर्वेभ्यो ज्योतिष्टोमः' इत्यत्र सर्वपदस्य सङ्कोचं कृत्वा स्वर्गातिरिक्तसर्वफलकत्वबोधने तात्पर्यं कल्प्यते, तदा

प्रकृते ऽपि तुल्यम् । तस्मादवान्तरवाक्यैर्विदिततत्त्वम्पदार्थस्याऽधिकारिणस्तत्त्वमस्यादिवाक्योत्थसाक्षात्कारेणाविद्यानिवृत्तिर्जायते । तदुक्तं भगवता नार[दे]न ।—'तत्त्वमस्यादिवाक्योत्थज्ञानं मोक्षस्य साधनम् । ज्ञाने त्वनाहते सिद्धे सर्वं ब्रह्ममयं भवेत्' इति ।

ननु कथं शब्दात्साक्षात्कारः, शब्दस्य परोक्षज्ञानजनकत्वस्वाभाव्यात् । अन्यथा ऽनुमानेनाऽपि साक्षात्कारोत्पत्तिप्रसङ्गात् । तस्मादिन्द्रियजन्यज्ञान एवाऽपरोक्षत्वमिति न शाब्दाऽपरोक्षमिति चेन्न । न तावदिन्द्रियजन्यत्वं ज्ञानस्याऽपरोक्षत्वं, सुखादिज्ञाने तदभावप्रसङ्गात् । तस्य केवलं साक्षिभास्यत्वस्य प्रागुक्तत्वात् । परपक्षे ज्ञानमात्रस्याऽपरोक्षताऽऽपत्तेश्च । जन्यज्ञाने सर्वत्र मनसः कारणत्वात्तस्य चेन्द्रियत्वात् । न चेन्द्रियत्वेन तस्य सर्वत्र जनकत्वं नास्तीति वाच्यम् । इन्द्रियत्वस्य गुरुतया कारणताऽनवच्छेदकत्वात् । चक्षुरादेरेव तथात्वात् । नाऽप्यपरोक्षत्वाज्जातिः । तस्याः वृत्तिनिष्ठत्वे सुखादेः शुक्तिरजतादेश्चाऽपरोक्षता न स्यात् तस्य केवलं साक्षिभास्यत्वात् । साक्षिनिष्ठत्वे चाऽज्ञाततया तद्भास्यविप्रकृष्टघटादेरप्यपरोक्षार्थविषयकत्वमेव वृत्तेरपरोक्षत्वम् । अर्थस्य चाऽपरोक्षत्वमनावृतसाक्षितादात्म्यं, संविदन्तु स्वरूपमेव तत् । "तत्साक्षादपरोक्षाद् ब्रह्म" इति श्रुतेः । साक्षादितिपदेन घटादितुल्यताव्यावर्तनात् । तस्माद् ब्रह्मणः स्वत एवाऽपरोक्षत्वात्तद्विषयकं ज्ञानं शब्दजन्यमप्यपरोक्षार्थविषयकत्वादपरोक्षमिति सिद्धं शाब्दापरोक्षम् ।

नन्वेवमनुमितेरप्यपरोक्षताऽऽपत्तिः । त्वदुक्तप्रकारेण तत्राऽ-

ऽपरोक्षतासम्भवादिति चेन्न । चैतन्यांशे ऽपरोक्षत्वस्येष्टत्वात् । यत्र चक्षुःसन्निकृष्टपर्वतादौ वन्ह्याद्यनुमितिस्तत्र पर्वताद्यंशे ऽप्यपरोक्षत्वस्येष्टत्वात् । न च प्रत्यक्षत्वाऽनुमितित्वजात्योः सङ्करः, सिद्धान्ते प्रत्यक्षत्वस्य जातित्वाऽनभ्युपगमात् । अतएव दीर्घशष्कुलीभक्षणादौ रूपरसादिविषयकं पञ्चेन्द्रियजन्यमेकमेव ज्ञानमिति सिद्धान्तः । तत्र ज्ञानभेदकल्पने प्रमाणाऽभावात् । तदुक्तं नृसिंहाश्रमगुरुवरणैः-"पञ्चेन्द्रियाणां युगपन्निजाऽर्थयोगे तदर्थेषु मितिः कथं न । मनोऽणुतायां किमपि प्रमाणं न वा तदर्थप्रमितिप्रभेदे" इति । किं बहुना, सर्वा अपि वृत्तयश्चैतन्यांऽशे ऽपरोक्षा एव, अत एव सकलप्रमाणगोचरं ब्रह्मेति राद्धान्तः ।

नन्वौपनिषदत्वविरुद्धोऽयं राद्धान्त इति चेन्न । मानाऽभावप्रयुक्ताऽसत्त्वशङ्का येन यत्र व्यावर्त्यते तदेव तत्र मानमिति व्यवह्रियते । घटाऽऽद्याकारा वृत्तिर्यद्यपि घटाऽवच्छिन्नचैतन्यं विषयीकरोति, तथाऽपि ब्रह्म चित्स्वरूपं न वा, आनन्दरूपं न वेत्यादिसंशयनिवर्तने ऽसमर्थेति सा तत्र मानमिति नोच्यते । सत्यादिवाक्योत्था वृत्तिस्तु ब्रह्मविषयकं संशयं निवर्तयतीति सत्यादिवाक्यमेव तत्र मानमित्यौपनिषदं ब्रह्मोच्यते ।

अथवा तत्त्वपदार्थावच्छिन्नस्य सकलप्रमाणगोचरत्वं, शुद्धस्य त्वौपनिषदत्वमिति न सिद्धान्तयोः परस्परविरोधः, ।

नन्वेवमपि तत्त्वमसीत्यादिवाक्यात्कथं शाब्दो बोधः, शाब्दे बोधे तात्पर्यज्ञानस्य कारणत्वात् । तात्पर्यञ्च तत्प्रतीतीच्छयोच्चरितत्वम् । तच्च त्वन्मते वेदे न सम्भवति, तस्य

त्वया निश्वसितादिश्रुत्यनुरोधेनाऽपौरुषेयत्वाऽभ्युपगमात्। अपौरुषेयत्वञ्च न पूर्वमीमांसकमत इवेश्वराऽप्रणीतत्वम् "ऋचः सामानि जज्ञिरे" इत्यादि श्रुतिविरोधात्। किन्तूद्दृश्य रचितत्वाऽभाव एवेति त्वदाचार्यैर्व्यवस्थापितत्वादिति चेत्, उच्यते। फलवत्प्रतीत्यनुकूलत्वन्तात्पर्यं, स च शब्दस्यैव धर्मः, स चोपक्रमोपसंहारादिभिर्निर्णीयते। तदुक्तम्-"उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये" इति। एतच्च तात्पर्यं वेदस्याऽपौरुषेयत्वेऽपि सम्भवतीति तत्त्वमस्यादिवाक्याच्छाब्दबोधोत्पत्तौ न काऽप्यनुपपत्तिः।

वस्तुतस्तु शाब्दे बोधे तात्पर्यज्ञानङ्कारणमेव न भवति, प्रमाणाऽभावात्, व्यभिचाराच्च। रुद्रौदनादिप्रतिपादकवाक्यानां स्वार्थे तात्पर्यं नास्तीति "तात्पर्यन्तु न जानामि" इत्यादि व्यवहारदर्शनात्। न चैवं 'अयमेति पुत्रो राज्ञः' 'पुरुषोऽपसार्यताम्' इति वाक्ये राजपदस्य पुत्रपुरुषाऽन्यतराऽन्वयतात्पर्यसंशयदशायामपि शाब्दज्ञानप्रसङ्ग इति चेन्न। तात्पर्यज्ञानस्य कारणत्वं वदताऽपि समभिव्याहृतपदानामेकवाक्यताज्ञानं शाब्दबोधे कारणमिति वक्तव्यमेव। अन्यथा 'गङ्गायां घोषः' इत्यत्र नीरतीरपदयोरध्याहारेणाऽपि शाब्दबोधोपपत्तेर्नियमेन तीरे लक्षणाकल्पनं न स्यात्। तथा च प्रकृते राजपदस्य पुरुषादिपदेन सहैकवाक्यताज्ञानाऽभावादेव शाब्दज्ञानविरहो नतु तात्पर्यज्ञानविरहात्।

नन्वेकवाक्यताज्ञाने विद्यमानेऽपि तात्पर्याऽनिश्चये क्वचित्संशयो दृश्यते यथा-'हस्तेन दीर्घेण कुठारेण वृक्षं छिनत्ति' इत्यादौ किं हस्तः कुठारो वा दीर्घ इति। तथा च तत्र

तात्पर्यनिश्चयस्य कारणत्वे एकत्र क्लृप्तत्वेन शाब्दज्ञानमात्रे तस्य कारणतेति चेन्न। तत्राऽपि तात्पर्यनिश्चयात्पूर्वमेवोभयत्राऽपि दीर्घत्ववैशिष्ट्यऽवगाहिशाब्दो बोधो जायत एव, पश्चात्तरं तात्पर्यसंशयरूपदोषात्संशयः। तथाऽप्युभयत्र तात्पर्यनिश्चये सत्युभयत्र दैर्घ्यवैशिष्ट्याऽवगाही बोधो जायतएवेत्यभ्युपगमात्।

ननु निश्चिते कथं संशय इति चेन्न। प्राथमिकज्ञानस्याऽऽपातरूपतया संशयाऽविरोधित्वात्। प्रमेय इति निश्चितेऽपि घटे परेणाऽपि संशयाऽभ्युपगमाच्च। न च घटत्वप्रकारकं ज्ञानं घटो न वेति संशयविरोधि, इदञ्च न तथेति वाच्यम्। प्रमेयमिति ज्ञानस्याऽपि घटत्वप्रकारकत्वात्। भासमानवैशिष्ट्यप्रतियोगित्वस्यैव प्रकारत्वात्। नच सामान्यधर्माऽप्रकारकं ज्ञानं संशयविरोधि, इदञ्च न तथेति वाच्यम्। प्रमेयो घट इति ज्ञानादपि तदनिवृत्त्यापत्तेः। नचेदमपि घटत्वाद्यंशे सामान्यधर्माऽप्रकारकमेवेति वाच्यम्, प्रमेयघटत्ववानयमिति ज्ञानाद् घटो नवेति संशयनिवृत्त्यनापत्तेः। तस्य घटत्वांऽशे सामान्यधर्मप्रकारकत्वात्।

नन्वेवमप्यनेकार्थशब्दप्रयोगे युगपत्तावत्पदार्थसंसर्गबोधो न जायतइति सर्वं सम्प्रतिपन्नम्। तत्र च तात्पर्यज्ञानाऽतिरिक्तसामग्रीसत्त्वात्तद्विरहादेव शाब्दबोधविरहः। तत्रैव क्लृप्तत्वात् तस्य सर्वत्र कारणतेति चेन्न। अनेकार्थपदाद्युगपत्सकलपदार्थस्मृतौ प्रमाणाऽभावात्। भावे वा भवत्येवाऽन्वयबोधः। तात्पर्यग्रहे सति तावत्पदार्थाऽन्वयबोधस्य त्वयाऽप्यभ्युपगमात्। तस्मात्तात्पर्यज्ञानं न शाब्दबोधे कारणमिति सिद्धम्। नन्वेवं किं श्रवणेन, तथा हि-श्रवणं

नामाऽद्वितीये ब्रह्मणि वेदान्ततात्पर्याऽवधारणाऽनुकूलो व्यापारः । स च तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वएवोपयुज्यते, नाऽन्यथा । तथा चैकं संधित्सतो ऽपरं प्रच्यवते इति न्यायाऽऽपात इति चेन्न । तात्पर्यविपर्ययस्य तत्संशयस्य च दोषतया शाब्दभ्रमोत्पादकत्वेन तन्निवर्तकतया श्रवणस्य सार्थकत्वात् । तस्मात्तात्पर्यज्ञानस्य शाब्दबोधाऽहेतुत्वेऽपि न श्रवणादिवैयर्थ्यम् ।

एवमाकाङ्क्षायोग्यताऽऽदिज्ञानानामपि न शाब्दबोधकारणता, प्रमाणाऽभावात् । यत्तु गुणाऽनुरोधेन योग्यताज्ञानं कारणमिति, तन्न । असति दोषे चक्षुरादिनैव प्रमोत्पत्तिसम्भवेन तस्यां गुणस्याऽहेतुत्वात् । स्वरूपसत्या योग्यताया एव गुणत्वसम्भवेन गुणतयाऽपि तज्ज्ञानस्य कारणत्वे प्रमाणाऽभावाच्च ।

वस्तुतस्तु शाब्दे बोधे न स्वरूपसती योग्यता न वा तज्ज्ञानङ्कारणम्, योग्यताविरहे ऽयोग्यतानिश्चये विद्यमानेऽपि शाब्दबोधदर्शनात् । तथा हि—"अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः सङ्ख्यया, प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाऽकीर्तयः । गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरान्मूकानाम्प्रकरेण कूर्मरमणीदुग्धोदधे रोधसि ॥

"एष वन्ध्यासुतो याति खपुष्पकृतशेखरः" । इत्यादिपद्येभ्यः प्रतीतिस्तावदुत्पद्यत एव, परन्तु विषयाऽसत्त्वात्तद्विषयिणी सा । यस्त्वत्र सचेतसां सूक्तैवोचितेति, तत्स्वात्मनोऽपि प्रतारणम् । तथा हि-अत्र सूक्ततेति वदन्तः प्रष्टव्याः किं शब्दे सूकता उताऽर्थे । नाद्यः, शब्दप्रयोगस्य भवद्भिरपि क्रियमाणत्वात् । नाऽन्त्यः, अर्थस्यैवाऽबोधे अत्र सूक-

सेति परबोधनाऽसम्भवात् । न हि स्वयं तमर्थं न जानात्येव, परस्य तु तत्र मूकतां व्युत्पादयतीति सम्भवति । तस्मादेतादृशवाक्यादपि ज्ञानमुत्पद्यत एव । तदुक्तं शाब्दमर्यादाविद्भिः—"अत्यन्ताऽसत्यपि ज्ञानमर्थे शब्दः करोति हि" इति । तस्माद्योग्यतादिज्ञानं शाब्दबोधे न कारणमिति सिद्धम् ।

तथा च सुष्ठूक्तम्—'तत्त्वमस्यादिवाक्योत्थसाक्षात्कारादविद्यानिवृत्तिर्जायते' इति । सा चाऽविद्यानिवृत्तिरधिष्ठानात्मिकैव न ततोऽतिरिक्ता । तदुक्तं स्कान्दे—"विद्यया-परयाऽविद्यानिवृत्तौ ब्रह्म केवलम् । शिष्यते खलु नाऽभावो भावो वाऽन्यस्तथैव च" इति । नन्वेवं तस्यास्तत्त्वज्ञानसाध्यत्वाऽनुपपत्तिः, अनादिपदार्थस्य साध्यत्वाऽयोगादिति चेन्न । परमते ऽनादिसिद्धस्याऽपि विघ्नप्रागभावस्य मङ्गलसाध्यत्ववत्, अनादिसिद्धस्याऽपि दुःखप्रागभावस्य प्रायश्चित्तसाध्यत्ववच्च, माध्वमते स्वरूपाऽऽत्मिकाया अप्यानन्दाऽभिव्यक्तेर्नारायणप्रसादसाध्यत्ववच्चाऽनादिसिद्धाया अप्यविद्यानिवृत्तेः प्रवृत्त्यङ्गसाध्यत्वसम्भवात् । तथा हि-साध्यत्वेन यदभिमतं तन्निरूपितप्रतियोग्यनुयोगिभावरूपसम्बन्धाश्रयो यः प्रागभावः, तन्नाशकस्वस्वाऽभावव्याप्येतरसकलसमवधाने सति यस्मिन् सत्यग्रिमक्षणे यस्य सत्त्वं, यद्व्यतिरेके चाऽसत्त्वं, तत्तस्य साध्यम् । दण्डसाध्ये घटे चैतदेवमनुवर्तनीयम् । साध्यत्वेन यदभिमतं घटः, तन्निरूपितप्रतियोग्यनुयोगिभावरूपसम्बन्धाश्रयो यः प्रागभावो घटप्रागभावः तन्नाशकं यद्दण्डतद्व्याप्येतरत्सकलं कुलालादि, तत्समवधाने सति दण्डे सत्यग्रिमक्षणे घटसत्त्वं,

दण्डव्यतिरेके च घटाऽसत्त्वं तद्घटस्वरूपं दण्डसाध्यमिति। रासभसाध्यत्वन्तु नाऽस्ति, रासभव्यतिरेके घटव्यतिरेकाऽभावात्। एवं मङ्गलसाध्यविघ्नप्रागभावेऽप्येतत्साध्यत्वमक्षतम्। तथा हि—साध्यत्वेन यदभिमतं, विघ्नप्रागभावः, तन्निरूपितप्रतियोग्यनुयोगिभावरूपसम्बन्धाश्रयो यः प्रागभावो विघ्नप्रागभाव एव, तन्नाशकमङ्गलमङ्गलाभाव तद्व्याप्येतरसकलसमवधाने सति मङ्गलसत्त्वे विघ्नप्रागभावसत्त्वं, मङ्गलाभावे तदभाव इति विघ्नप्रागभावोऽपि मङ्गलसाध्यः। एवं तत्त्वज्ञानसाध्याऽविद्यानिवृत्तावपि योजनीयम्। तथा हि साध्यत्वेन यदभिमतमधिष्ठानाऽऽत्मकमविद्यानिवृत्तिस्वरूपं, तन्निरूपितप्रतियोग्यनुयोगिभावरूपसम्बन्धाश्रयो यः प्रागभावोऽविद्यारूपः, तन्नाशकं यत्तत्त्वज्ञानं तद्व्याप्येतरसकलं कालादि, तत्समवधाने सति तत्त्वज्ञाने सत्यग्रिमक्षणेऽविद्यानिवृत्तेः सत्त्वं, तत्त्वज्ञानव्यतिरेके चाऽविद्यानिवृत्तेरभावोऽविद्यैव, तन्निवृत्तिस्वरूपं तत्त्वज्ञानसाध्यमिति।

न च तत्त्वज्ञाने सत्यग्रिमक्षण एव दुर्लभस्तेन सर्वस्य निवृत्तिरिति वाच्यम्, वृत्तेरेव क्षणत्वात्। न चाऽविद्यायाः प्रागभावत्वाऽनुपपत्तिः, अनादिकादाचित्काऽभावत्वस्यैव प्रागभावत्वेनाऽविद्याया अपि तत्सम्भवात्। नन्वेवमविद्यानिवृत्तेर्घटादिसाध्यत्वमपि स्यात्। तथा च मुमुक्षोस्तत्त्वज्ञानोद्देशेन श्रवणादाविव घटाद्युद्देशेनाऽपि प्रवृत्तिः स्यादिति चेन्न। यस्मिन्सतीत्यत्र यस्मिन्नन्यथासिद्धे सतीत्यस्य विवक्षितत्वात्। घटादेश्चाऽन्यथासिद्धत्वात्। तथा हि—'तरति शोकमात्मवित्' 'तमेव विदित्वाऽतिमृत्युमेति' इत्यादिश्रुत्या

ज्ञानस्याऽवश्यकल्प्यत्वे तत्सहभूतं घटाऽऽद्यन्यथासि-
द्धम् । न चैवं कालादेरप्यन्यथासिद्धत्वेन स्वेतरसकलसमवधा-
नतीतत्र सकलपदार्थाऽसिद्धिः, 'धर्मोऽसौ न सन्देहः सर्व-
कार्येषु कारणम् । उपभोगनिमित्तं हि देहाद्देहाऽन्तरागमः'
इति विष्णुपुराणात् । 'सरितः सागराश्चैव भावाऽभवौ च
पन्नगाः । सर्वे कालेन सृज्यन्ते ह्रियन्ते च पुनः पुनः' इति म-
हाभारतात् । 'कालेन जातो विकृतो विनश्यति कालं ह्यतो
रुद्रन् विमदो विमत्सरः' । इत्यादिस्मृत्यनुरोधेन कालादेरपि
कारणत्वात् । नचैवं "नान्यः पन्था विद्यतेऽयनाय" इति
श्रुतिविरोधः, विशेषविषयकाऽऽचारेण सामान्यस्मृतेरिव वि-
शेषविषयकस्मृत्या सामान्यश्रुतेरपि सङ्कोचस्य न्याय्यत्वात् ।
तस्मादधिष्ठानात्मिकाया अप्यविद्यानिवृत्तेः साध्यत्वमुप-
पन्नम् । वस्तुतस्तु अनन्यथासिद्धे यस्मिन्सति यत्सत्त्वं तत्त-
त्साध्यम् । तथा चाऽनन्यथासिद्धं ब्रह्मज्ञानोत्तरकालीनाऽवि-
द्यानिवृत्तिरपि तत्साध्येति सर्वमनवद्यम् ।

अथवाऽविद्यानिवृत्तिरतिरिक्तैव, सा च पारमार्थिकी,
नेह नानाऽस्तीत्यादिश्रुत्या तात्पर्येणः प्रतिपाद्यमानाया-
स्तस्याः मिथ्यात्वाऽयोगात् । न चैवमद्वैतभङ्गः भावाऽद्वै-
ताऽभ्युपगमात् । 'तरति शोकमात्मवित्' इत्यादिश्रुतिप्रामा-
ण्याऽनुरोधेन तस्यैव न्याय्यत्वात् । न च तस्याः दृश्यत्वेन
मिथ्यात्वमावश्यकम्, दृश्यभावत्वस्यैव मिथ्यात्वव्याप्यत्वा-
त् । न च दृश्याऽध्यासमन्तरेण दृश्यत्वाऽनुपपत्तिः, दृशा
सह स्वरूपसम्बन्धेनाऽपि तदुपपत्तेः । नचैवं वियदादेरपि
स्वरूपसम्बन्धेनैव दृश्यत्वोपपत्तौ मिथ्यात्वं न सिद्ध्ये-
दिति महत्सङ्कटमिति वाच्यम् । अनुकूलतर्काऽन्तरोपष्टम्भ-

श्रुत्यादिबलात्तत्सिद्धेः । केवलतर्केण पदार्थाऽसिद्धेः प्रागुक्तत्वात् । "पाषण्डिनो विकर्मस्थान् वैडालव्रतिकान् शठान् । हैतुकान् बकवृत्तींश्च वाङ्मात्रेणाऽपि नाऽर्चयेत्" इति मनुना, 'चोद्यो न हेतुर्वेदार्थे चोद्यं कुर्वन् पतत्यधः । अतः सर्वं परित्यज्य वेदमेकं समाश्रयेत्' इति स्कान्दे । 'अहमासं पण्डितको हैतुको वेदनिन्दकः । आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम् । हेतुवादान्प्रवदिता वक्ता संसत्सु हेतुमत् । आक्रोष्टा चाऽभिवक्ता च ब्रह्मयज्ञेषु वै द्विजान् । नास्तिकः सर्वशङ्की च मूर्खः पण्डितमानिकः । तस्येयं फलनिर्वृत्तिः शृगालत्वं मम द्विज' । इति महाभारते च केवल हैतुकत्वस्य निषिद्धत्वाच्च । यत्तु दृश्यभावत्वस्यैव मिथ्यात्वव्याप्यत्वे भेदेऽस्य मिथ्यात्वं न सिद्ध्येत्, तस्याऽभावरूपत्वादिति, तदस्मत्सिद्धान्ताऽनवबोधमूलकम्, सिद्धान्ते पराऽभिमत विभागवद्भेदस्य भावरूपत्वात् । तथा च दृश्यभावत्वस्य तत्राऽपि सत्त्वाद् भेदस्याऽपि मिथ्यात्वम् । 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता' इत्यादिश्रुत्या, 'द्वौ सुपर्णौ शरीरेऽस्मिन् जीवेशाख्यौ हृदि स्थितौ । तयोर्जीवः फलं भुङ्क्ते कर्मणो न महेश्वरः । केवलं साक्षिरूपेण विना भोगं महेश्वरः । प्रकाशते स्वयं भेदः कल्पितो माययातयोः, इत्यादिस्मृत्या च स्पष्टं भेदस्य मिथ्यात्वाऽवधारणात् । तस्मादधिष्ठानादतिरिक्तैवाऽविद्यानिवृत्तिः । सा च तत्त्वज्ञानेनोत्पाद्यते, न चोपादानाभावात्तदुत्पत्त्यनुपपत्तिः, भावकार्यस्यैवोपादानसापेक्षत्वात् । परेणाऽपि ध्वंसस्योपादानाऽनभ्युपगमादिति ।

केचित्तु, अविद्यानिवृत्तिर्नाम निःस्वरूपतैव, सैव तत्त्वज्ञानसाध्या ।

ननु केयं निःस्वरूपता नाम, ध्वंसः, अतिरिक्ता वा, नाऽऽद्यः, पूर्वोक्तपक्षाद्विशेषात्। नाऽन्त्यः, अनिर्वचनादिति चेदुच्यते—सत्यप्रपञ्चवादिनाऽपि ध्वंसाऽतिरिक्ता निःस्वरूपता ऽवश्याऽभ्युपेया। अन्यथा घटध्वंसाऽनन्तरमपि घटोपलम्भः किमिति न भवेत्। घटस्य ध्वस्तत्वादिति चेन्न। ध्वंसो नाम पदार्थाऽन्तरमुत्पद्यतां नाम, तावता घटस्याऽनुपलम्भः कुतः। ननु तदानीं घट एव नास्ति, कस्योपलम्भ आपाद्यतइति चेन्न। घटो नास्तीति वचनस्य कोऽर्थः? किं घटो निःस्वरूपो जातः, उत तस्य ध्वंस उत्पद्यतइति। आद्ये स्वीकृतैव भवताऽपि निःस्वरूपता, अन्त्ये ध्वंसाऽऽख्यपदार्थाऽन्तरोत्पत्तावपि घटाऽनुपलम्भः कुतः? अन्यस्योत्पत्त्या ऽन्यस्याऽनुपलम्भः, घटोत्पत्त्या दण्डाऽनुपलम्भप्रसङ्गात्। ननु घटोपलम्भे ध्वंसः प्रतिबन्धकइति चेत्, किं विद्यमानस्य घटस्य ग्रहे प्रतिबन्धकता, उताऽविद्यमानस्य? नाऽऽद्यः, ध्वंसकाले प्रतियोगिनो विद्यमानत्वाऽयोगात्। नाऽन्त्यः, निःस्वरूपताऽतिरिक्ताया अविद्यमानताया निर्वक्तुमशक्यत्वात्। ननु विद्यमानध्वंसप्रतियोगित्वमेव ध्वस्तस्याऽविद्यमानत्वमिति चेन्न। ध्वंसप्रतियोगित्वमपि किं विद्यमानस्य, उताऽविद्यमानस्य? नाऽऽद्यः, पूर्वोक्तव्याघातात्। नाऽन्त्यः, निःस्वरूपताऽतिरिक्ताऽविद्यमानताया निर्वक्तुमशक्यत्वात्। तस्मादवश्याऽभ्युपेयनिःस्वरूपतयैव ध्वस्त इति व्यवहारोपपत्तौ किं ध्वंसाऽऽख्यपदार्थान्तरेण।

ननु बुभुत्सया पृच्छामः, केयं निःस्वरूपता नामेति चेत्, स्वरूपस्य तुच्छतैवेति परिभावयन्तु। तदुक्तं सिद्धु-

न्तमुक्तावल्याम्—'तुच्छा ऽनिर्वचनीया च वास्तवी चेत्यसौ त्रिधा । ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः' इति । तस्मादविद्यायास्तुच्छतैव तत्त्वज्ञानसाध्येति निरङ्कुशो ऽद्वैतमेव परमार्थः । तदुक्तं स्कान्दे—"परमाऽद्वैतविज्ञानमेव ग्राह्यं यथास्थितम् नाऽन्यतर्कैश्च हन्तव्यमिदमाम्नायवाक्यजम् । द्वैतमेव हि सर्वत्र प्रवदन्ति हि केचन । न ते मनुष्याः कीटाश्च पतङ्गाश्च घटा हि ते" । इति । घटा इति । घटवदचेतना अति मूढा इति भावः । तस्मात्सर्वथा ऽप्युपपन्नमेतत्तत्त्वमस्यादिवाक्योत्थसाक्षात्कारेणाऽविद्यानिवृत्तिरिति ।

तत्र वाक्योत्थसाक्षात्कारेणाऽऽवरकाऽज्ञानांऽशे निवृत्तेऽपि प्रारब्धेन प्रतिबन्धाद्विक्षेपशक्तिमदज्ञानांशो न निवर्तते, तथा च विक्षेपांऽशस्याऽऽदेहपातमनुवृत्तेर्जीवन्मुक्तस्याऽपि भोग इति जीवन्मुक्तिप्रतिपादकशास्त्रादभ्युपगम्यते । तथा च श्रुतिः—'तस्य तावदेव चिरं यावन्न विमोक्ष्ये ऽथ संपत्स्ये' इति । अस्या अर्थः—तस्य उत्पन्नसाक्षात्कारस्य विदेककैवल्ये तावदेव चिरं तावानेव विलम्बः, यावन्न विमोक्ष्ये यावत्प्रारब्धकर्मणः सकाशान्न विमोक्ष्यते, अथ संपत्स्ये अथ ब्रह्मसम्पन्नो भवतीति । स्मृतिरपि,—'देहञ्च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपम् । दैवादुपेतमुत दैववशादपेतं वासो यथा परिधृतं मदिरामदान्धः । देहोऽपि दैववशगः खलु कर्म यावत्स्वारम्भकं प्रतिसमीक्षत एव साऽसुः । तं सप्रपञ्चमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः' । इत्यादिका आवरणाऽभावं विक्षेपसद्भावञ्च दर्शयति

निवृत्ताऽऽवरणतया देहाऽभिमानाऽभावात्तेन प्रारब्धाऽनुरोधेन निषिद्धाऽऽचरणेऽपि तस्य न पापं, तथा विहिताऽनुष्ठानेन पुण्यम् । तथा च श्रुतिः—"यथा खलु पुष्करपत्रे माऽऽपः श्लिष्यन्ति एवं हैवं विदित्वा पापं कर्म न श्लिष्यते" इति । तथा पारमर्षं सूत्रमपि—'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्' इति ।

स्यादेतत् । प्रारब्धेन प्रतिबन्धाद्विक्षेपांऽशो न निवर्तत इत्ययुक्तम् । अनाद्यज्ञानेंऽशाऽभावात् । पश्चात्तन्निवृत्तिरप्यनुपपन्ना । वाक्योत्थज्ञानस्य पूर्वमेव नष्टत्वात् । ज्ञानस्य स्वकार्ये प्रतिबन्धप्रतीक्षयोरदर्शनाच्चेति चेन्न । अनिर्वचनीयेऽज्ञानेंऽशाऽभ्युपगमे बाधकाऽभावात् । माध्वैरनादेर्जीवस्याऽणुपरिमाणस्याऽप्यंशाऽभ्युपगमाच्च । नैयायिकादिभिराकाशादेरंशाऽनभ्युपगमे तत्राऽव्याप्यवृत्तिघटादिसंयोगाऽनुपपत्तेश्च । न च वाक्योत्थज्ञानाऽभावात्पश्चात्तन्निवृत्त्यनुपपत्तिः, स्त्रीशूद्रादीनां तदपेक्षाऽभावात् । तेन विनाऽपि पुराणादिश्रवणोत्थज्ञानेन, तत्राऽप्यनधिकारिणां भाषाप्रबन्धोत्थज्ञानेनाऽपि मोक्षसिद्धेः । तदुक्तं स्कान्दे—'अहित शूद्रस्य शुश्रूषोः पुराणेनैव वेदनम् । वदन्ति केचिद्विद्वांसः स्त्रीणां शूद्रसमानताम् । अन्येषामपि सर्वेषां ज्ञानाऽभ्यासो विधीयते । भाषाऽन्तरेण कालेन तेषां सोऽप्युपकारकः' इति । तेषां शास्त्रीय व्युत्पत्तेरभावात् । भावनादेर्बह्वायासनिवर्त्यत्वात् कालेनेत्यभिहितम् । येषान्तु वाक्योत्थज्ञानाऽपेक्षा, तेषां पूर्वमुत्पन्नेनैव ज्ञानेनाऽऽवरणस्य निवर्तितत्वान्निवृत्तावरणचैतन्यादेव प्रतिबन्धकनिवृत्तौ सत्यां तन्निवृत्त्युपपत्तेः । वृत्तेरज्ञाननिवर्तकत्वपक्षेऽपि पुनरपि तत्त्वमस्यादिवाक्योत्थज्ञानकल्पने बाधकाऽभावात् । श्रुत्यादेः साधकस्योक्तत्वाच्च ।

यत्तु ज्ञानकार्ये प्रतिबन्धो न दृष्ट इति, तन्न। ज्ञानकार्येऽपि प्रवृत्त्यादौ प्रतिबन्धदर्शनात्। श्रुत्यादिविरोधेनैतेषां कुतर्काणामाभासत्वाच्च। तस्मात्तत्त्वमस्यादिवाक्यादुत्पन्नसाक्षात्कारादावरणशक्तिनंद्यानांऽशस्य तत्स्थत्वयधीनस्थितिकावरणस्य जन्मान्तरप्रापकप्रारब्धेतरकर्मणश्च निवृत्तौ सत्यां प्रारब्धाऽनुसारेण किञ्चित्कालं सशरीरो जीवन्मुक्तिमनुभूय भोगात्प्रारब्धनिवृत्तौ निवृत्ताऽऽवरणचैतन्याद्वाक्योत्थवृत्त्या वा विक्षेपांशनिवृत्तौ सत्यां सच्चिदानन्दरूपं ब्रह्म प्रतिपद्यत इति सिद्धम्।

अखण्डानन्दसद्बोधो वासुदेवो दयानिधिः।
निरन्तरं हृदम्भोजे व्याजेनाऽनेन चिन्तितः॥
वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा।
भट्टोजीभट्टसंज्ञं तं गुरुं नौमि निरन्तरम्॥
गुरूणां चरणाम्भोजकृपया ऽयं मया कृतः।
श्रीमत्तत्त्वविवेकाब्धेः सारोद्धारः सतां मुदे॥

इतिश्रीमत्परमहंसपरिव्राजकाऽऽचार्यवर्यश्रमिदानन्दाश्रमचरणाऽरविन्दसेवापरायणेन रङ्गोजीभट्टेन विरचितोऽद्वैतचिन्तामणिः समाप्तः।

॥ श्रीः ॥

# अद्वैतचिन्तामणौ प्रमाणतयोपन्यस्तानां श्रुतिस्मृतिपुराणादिवचनानां तत्तदुपलब्धाधारभूतमूलग्रन्थनिर्देशः ।

[१] तत्त्वमसि । १,१७,४३,२० ( छान्दोग्योपनिषदि )

[२] सत्यं ज्ञानमनन्तं ब्रह्म । १,१७,३९,२ (तैत्तिरीयोपनिषदि, ब्रह्मानन्दवल्ल्याम् )

[३] तद्विज्ञानार्थं स गुरु० । ३,१७ (मुण्डकोपनिषदि, द्वितीयखण्डे )

[४] कच्चिन्न लौकायति० ४,९ ( रामायणेऽयोध्याकाण्डे )

[५] प्राचीनै र्व्यवहार० २०, ७ ( सिद्धान्तलेशसङ्ग्रहे २ तीयः श्लोकः )

[६] अत्रायं पुरुषः स्वयं ज्योतिः । २१, ६ ( बृहदारण्यकोपनिषदि, ४ र्थे अध्याये, ३ ये ब्राह्मणे )

[७] न तत्र रथा० २३, १८ ( बृहदारण्यके ४ र्थेऽध्याये ३ यब्राह्मणे )

[८] सुखमस्यात्मनो० २५, २३ ( भागवते ७ मस्कन्धे १३ अध्याये ( २६ शः श्लोकः )

[९] इन्द्रियाणां हि चरतां० २८, १२ ( भगवद्गीतायां २ ये ऽध्याये ६७ श्लोकः )

[१०] कामः सङ्कल्पो विचिकित्सा० २७, १७ ( बृहदारण्यकोपनिषदि ५ मब्राह्मणे )

(३७) आत्मा ऽव्ययो गुणः शुद्धः० २१, ७ ( भागवते ११ स्कन्धे २८ अध्याये ११ शः श्लोकः )

(३८) यावद्देहेन्द्रियप्राणै० २७, ४ ( भागवते १२ शः श्लोकः )

[३९] असत्त्वादात्मनो० २६, २३ ( " " १३ शेऽध्याये ३१ श्लोकः )

[४०] अहङ्कारकृतं बन्ध० २६, २१ ( ,, ,, २९ श्लोकः )

[४१] शोकहर्षभयक्रोध० २७, १८ ( " " २८ अध्याये १५ शः श्लोकः )

[४२] एकएव परो ह्यात्मा० ३०, ७, ( " " १८ अध्याये ३२ श्लोकः )

[४३] तस्मादिदं जगदशेष० ४५, ११ ( " १० स्कन्धे १४ अध्याये २२ श्लोकः )

[४४] तेषु कालेष्वजायन्त० ३७, २३ ( " " ७ अध्याये ५८ श्लोकः )

[४५] ईक्षेत विभ्रममिदं० ४५, १८ ( " " १८ अध्याये ३२ श्लोकः )

## स्कान्दवचनानि

[१] केचित्प्रधानं त्रिगुणं० ३,२४ ( स्कान्दे सूतसंहितान्तर्गतब्रह्मगीतायां २ येऽध्याये ६-९ श्लोकाः )

[२] एकत्वेपि पृथक्त्वेन० २८ ( स्कान्दे सूतगीतायां यज्ञवैभवखण्डोपरिभागे ५ मेऽध्याये ३३ शः श्लोकः )

[३] चित्तवृत्त्यभिसम्बन्ध० २८,८ ( स्कान्दे ब्रह्मगीतायां ३ येऽध्याये १४ शः श्लोकः

[४] सर्वेषान्तु मनस्तेन० २८,१४ ( " " ४ र्थेऽध्याये २ यः श्लोकः )

(५] अन्यथा भानहेतुत्वा० ३३,५ (" शिवमाहात्म्यखण्डे-८ मेऽध्याये १८-२१ श्लोकाः )

[६] माया च प्रलये काले परस्मिन् परमेश्वरे० । ३५,२ (" शिवमाहा० ८ मेऽध्याये १७ शः श्लोकः )

[७] तमहंप्रत्ययव्याजात्० ३५,८ ( " " ८ मेऽध्याये ३६ शः श्लोकः )

[८] अथवा देवदेवस्य० ३६,१८ ( " सूतगीतायां यज्ञवैभव-खण्डोपरिभागे ३ येऽध्याये २९ शः श्लोकः )

[९] मायया निर्मितं सर्वं० ४६,६ ( " " ४ र्थेऽध्याये ३२ शः श्लोकः )

[१०] प्रतीत्या केवलं शक्ति० ४९,९ ( " ब्रह्मगीतायां यज्ञ-वैभवखण्डोपरिभागे ५ मेऽध्याये ३३ शः श्लोकः )

[११] अतीन्द्रियार्थविज्ञाने० ५०,१४ ( " सूतगीतायां ३ येऽध्याये ५-६ श्लोकः )

[१२] व्यावहारिकसत्यार्थं० ५१,२१ ( ब्रह्मगीतायां २ ये-ऽध्याये २१ शः श्लोकः )

[१३] विद्यया परया विद्या० ६९,९, ( " ब्रह्मगीतायां १२ शेऽध्याये ९ मः श्लोकः )

[१४] परमाद्वैतविज्ञान० १४,४ ( " सूतगीतायां ३ ये
ध्याये ५४ श्लोकः )

(१५) कल्पितानामवस्तूनां० ५१,१० ( ब्रह्मगीतायां २
मेध्याये १९ श:श्लोकः )

इतोऽधिकान्यपि बहूनि श्रुतिस्मृतिपुराण शास्त्रीय ग्रन्थवचनानि प्रमाणतयोपन्यस्तानि सन्ति, येषां मूलं त्वरयान्वेषणेऽस्माभिर्नोपलब्धं तत्प-- रीक्षकाः कृपया स्वयमन्वेषयन्तु।

। श्रीः ।

# अद्वैतचिन्तामणौ प्रमाणतयोपन्यस्ता महर्षयो ग्रन्थकर्तारश्च ।

(१) भगवान् वासुदेवः । २८,१२

(२) व्यासः । २४,१७

(३) मनुः । ७२,२

(४) भगवान् नारदः । ६४,३

(५) भगवान् । ब्रह्मसूत्रकारः । ६३,८

(६) सुरेश्वराचार्यः । २०,१

(७) वाचस्पतिमिश्रः । ३७,१५

(८) संक्षेपशारीरककारः । ३७,१८

(९) नृसिंहाश्रमः । ३,१,२०,३,२८,१४

॥ श्रीः ॥

## अद्वैतचिन्तामणौ प्रमाणतयोपन्यस्ताग्रन्थाः ।

(१) माण्डूक्योपनिषद् ।
(२) मैत्रायण्युपनिषद् ।
(३) रामायणम् ।
(४) महाभारतम् ।
(५) भागवतम् ।
(६) भगवद्गीता ।
(७) पराशरोपपुराणम् ।
(८) ब्रह्मगीता ।
(९) विष्णुपुराणम् ।
(१०) पारमर्षसूत्रम् । ( ब्रह्मसूत्रम् )
(११) स्कान्दम् ।
(१२) ( न्याय ) लीलावती ।
(१३) ( वेदान्त ) सिद्धान्तमुक्तावली

——:o:——

## अद्वैतचिन्तामणौ प्रदर्शिता न्यायाः ।

(१) यद्विशेषणयोरिति न्यायः । ५५, १३
(२) एकं सन्धित्सतोऽपरं प्रच्यवते । ६८, ३

——:o:——

॥ श्री ॥

# अद्वैतचिन्तामणौ अर्थविशेषपराणां निर्देशार्हशब्दानामकारादिवर्णक्रमानुसारि सूचीपत्रम् ॥

—:o:—

## अ

औ

औपाधिक २६,२१ ( संसारः ) अस्यात्मनोऽहङ्कारोपाधिकत्वमुक्तम् ।

क

कर्तृ २७,६ आत्मनिरूपणे द्रष्टव्यम् ।

कर्तृत्व ४१,१४ ( क ) कार्यानुकूलज्ञानवत्त्वम् ।

४२,३ ( ख ) उपादानगोचरकृतिमत्त्वम् ।

इति द्विधा लक्षितम् ।

कृतहान २१,३ आत्मनो देहाऽनतिरिक्तत्वे ऽयं दोष उक्तः ।

(क) कर्मन् १,३ विश्वेश्वरार्पणबुद्ध्या ऽनुष्ठितै र्नित्यनैमित्तिकादिकर्मभिस्तत्त्वज्ञानप्रतिबन्धककल्मषनिवृत्तिः, ततः परमेश्वरप्रसादः, तस्माद्विवेकः, ततो वैराग्यम्, ततः शमाऽऽदिसम्पत्तिः, ततो मुमुक्षा, ततो जिज्ञासा, ततःसंन्यास इति कर्मणोऽपि परम्परया तत्त्वज्ञानसाधकत्वमुक्तम् ।

(ख) कर्मन् १२,१३ वैशेषिकाऽभिमतमेषां पञ्चत्वं खण्डितम् ।

१२,२० अस्य व्याप्यवृत्तित्वनियमः खण्डितः ।

करणनानात्व ७,६ इदं खण्डितम् ।

कल्मष १,१

काठिन्य १०,४ अस्य संयोगविशेषत्वमुक्तम् ।

कार्यानुकूलज्ञान ४१,१५ इदं ब्रह्मणो रूपमित्युक्तम् ।

४१,१९ अस्याऽविद्यावृत्तिरूपत्वं निरस्तम् ।

काल ६,१४ अस्येश्वराऽभेदो दर्शितः ।

कोमलत्व १०,४ अस्य संयोगविशेषत्वमुक्तम् ।

ल



व



श

शास्त्र ४३,११ प्रवर्तकं निवर्तकं वा शास्त्रमिति लक्षणं दूषयित्वा हितशासकं शास्त्रमित्युक्तम् ।

स

संन्यास ३,१६ अस्य ज्ञानसाधनत्वेन मुमुक्षोरावश्यकत्व मुक्तम् ।

स्वप्नसृष्टि २३,२५ असौ न पारमार्थिकीत्युक्तम् ।

समवाय १४,६ वैशेषिकाभिमतोऽयम्पदार्थः खण्डितः ।

संयोगजसंयोग ११,१२ नैयायिकाभिमतोऽयं खण्डितः ।

संयोगाभाव ८,२३ विभागस्यैतदनतिरिक्तत्वं कथितम् ।

संशय ३,२ अस्य निर्वचनम् ।

स्वप्रकाशत्व २४,२४ अस्य निर्वचनम् ।

स्वरूपलक्षण ४२,१३ ( ब्रह्मणः ) उक्तम् ।

सामान्य १३,३ वैशेषिकाभिमतोऽयम्पदार्थः खण्डितः ।

:o.——